# ॥ तृतीयः सर्गः ॥

आकुञ्चिताभ्यामथ पक्षतिभ्यां नभोविभागात्तरसावतीर्य ।
निवेशदेशाततधूतपक्षः पपात भूमावुपभैमि हंसः ॥१॥

अथ हंसो भैमीसमीपे भूमौ पतितः। अवस्थानयोग्यभूभागे प्रसारिताः सम्प्रकम्पिताः पक्षा येन सः। किं कृत्वा? कुटिलितसंक्षिप्ताभ्यां पक्षमूलाभ्यामुपलक्षितः सन्, व्योमदेशादधस्तादागत्य। पक्षतिभ्यामिति करणं वा ॥१॥

आकस्मिकः पक्षपुटाहतायाः क्षितेस्तदा यः स्वन उच्चचार ।
द्रागन्यविन्यस्तदृशः स तस्याः सम्भ्रान्तमन्तःकरणं चकार ॥२॥

हेतोरज्ञानादकस्माद्भवः। पक्षपुटाहतायाः पतनसञ्चयताडितायाः भूमेर्यस्तदा शब्द उद्गतः स भैम्या मनः संविग्नं चक्रे। कीदृश्याः? झगिति प्रस्तुतात् पदार्थादन्यस्मिन्नितस्ततो वर्तमाने वस्तुनि दत्ते दृशौ यया तस्याः ॥२॥

नेत्राणि वैदर्भसुतासखीनां विमुक्ततत्तद्विषयग्रहाणि ।
प्रापुस्तमेकं निरुपाख्यरूपं ब्रह्मेव चेतांसि यतव्रतानाम् ॥३॥

भैमीवयस्यानां नयनानि तमेवैकं हंसं प्रापुः। कीदृशम्? अवर्णनीयदेहसंस्थानम्। सौवर्णत्वान्निरूपं सौन्दर्यं वा। कीदृशि? त्यक्तस्तस्य तस्य विषयस्य निजग्राह्यस्य ग्रहः, आदानं यैस्तानि। स स विषयेषु ग्रहो वेति वा यथायोगं समासः। मालागुम्फनपल्लवलवनादि विहाय युगपत्तास्तमेवैकं ददृशुरित्यर्थः। कानीव, केषां, किम्? संयमिनां मनांसि अ-[64-a]-निर्णेयमूर्ति ब्रह्म परं तत्त्वमिव। न हि परमात्मनो रूपं किंसंस्थानं, किंगुणमिति केनाप्याख्यातुं शक्यते। तानि कीदृशि? विशेषेण मुक्तस्तस्य तस्य विषयस्य शब्दस्पर्शादेर्ग्रह आसङ्गो यैस्तानि। एतद् विस्तरस्तदागमात् ॥३॥

हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम्।
ग्रहीतुकामा दरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥४॥

एषा भैमी प्रयत्नात् स्थिरतराभूत्। कीदृशी? दरिणा सभयेन शयेन हस्तेन हंसं मरालमादातुमिच्छन्ती। किं कुर्वन्तम्? स्विकायां निजायामेव तनौ देहे सन्निहितं निकटस्थं चरन्तं निजभक्ष्यं भक्षयन्तम्। केव? मुनेर्मनोवृत्तिरिव। व्यवहृतिर्यथा- भाषानयने हूव्यानयनमिति न्यायात् तत्त्वतो मनोवृत्तिर्मन एव। यथा मुनेर्मनोवृत्तिरादरात् स्थैर्यं भजते। किं कर्तुकामा? आदरिणीकाग्रेणाशयेन भावेन हंसं परमात्मानं निजायां तनौ सम्यग् निहितं व्यस्तं चरन्तं करितुरगादिरूपेण भ्रमन्तं ग्रहीतुकामा परिचेतुमिच्छन्ती। भैमीपक्षे तनावित्युपचारो यथा गङ्गायां घोषः॥४॥

तामिङ्गितैरप्यनुमाय मायाममर्यं न भैम्या वियदुत्पपात।
तत्पाणिमात्मोपरि पातुकं तु मोघं वितेने प्लुतिलाघवेन ॥५॥

अयं हंसो वियत् खं नोड्डीनः। किं कृत्वा? चेष्टितैर्भैम्यास्तं प्रपञ्चं तर्कयित्वाऽपि। तर्हि किं चकारेत्याह। निजपृष्ठपतनोद्यतं तत्करं प्लुतिलाघवेन प्लुतेर्लाघवेन शश- -गतिचातुर्यात् निरर्थकं चक्रे। नोड्डीय गतो, न चात्मानमग्राहयत्। किन्तूत्प्लुत्यो- -त्प्लुत्य पुरः पुरः ससारेत्यर्थः ॥५॥

व्यर्थीकृतं पत्त्ररथेन तेन तथाऽवसाय व्यवसायमस्याः।
परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यतालम् ॥६॥

तत्कालं तं क्षणं तस्याः सखीभिरत्यर्थं हस्यते स्म। कथं यथास्यात्? अन्योऽन्यस्य दत्तकरतालवादनं यथा स्यात्। किं कृत्वा? अस्याः समुद्यमं तेन पत्त्ररथेन तेन प्रकारेण विफलीकृतमवसाय बुद्ध्वा। हस्तस्ताला इव हस्तताला:। ताल: कांस्यमयो घन- -वाद्यभेदः। तालश्चच्चत्पुटादिको वा। तद्वा हस्तयोस्ताला: ॥६॥

उच्चाटनीयः करतालिकानां दानाद्दिदानीं भवतीभिरेव ।

यान्वेति मां दुह्यति मह्यमेवं सात्रेत्युपालम्भि तयालिवर्गः ॥७॥

तया आलिवर्ग एवमुपालम्भि उपालब्धः। इति किं तदाह। भाने भवतीभिरेव हंस इदानीमुच्चाटनीयः, स्थानं त्याजनीयः। कस्मात्? करतालिकानां दानात्, वाद्यनादिति लोकोक्तिः। भवत्वेवम्। किंतु या मामत्रानुयाति सा मह्यमेव दुह्यति। सा मह्यमेव शपत [64.6] इत्यर्थः। अत्रेति भवतीषु मध्य इति वा। उच्चाटन-मुद्भेदनमभिचारकर्मविशेषो यद्वशाद् देह [1]स्थानात् स्थानान्तरं भ्रमन् क्वापि नावतिष्ठते। अत्र तूपचारः। लघुस्तालस्तालिका। करस्तालिका इव करतालिकाः। पर्यनुयोगो भवेदुपालम्भः ॥७॥

धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः ।

श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥८॥

अथ श्यामा भैमी हंसस्य पश्चाल्लगति स्मेति लोकोक्तिः। कीदृशी? [2]छायेव। करेण हस्तेन वा स्वल्पनवाप्तिरग्रहणं, ततो हेतोर्यन्मन्दाक्षं ह्रीस्तेन लक्ष्या दृश्या। लज्जावशाद् विभागान्तरं प्रतिपद्यमाना भामिन्यो नितान्तं दर्शनीया भवन्ति। मन्दाक्षविशेषिता वा। अन्यच्च कीदृशी? सखीनां [3]हसितेनर्म विचेष्टिते। धृताल्पकोपा स्थिरीकृतमनाक्क्रोधा। एवं हि कोपनाः खल्वतीव कोपमुद्वहन्ति। यथा भास्वन्तं सूर्यमभि सम्मुखं प्रयातुः पुरुषस्य छाया पश्चाल्लगति। साऽपि हंसस्य सूर्यस्य ये करा रश्मयस्तेषामनवाप्तिरनाक्रमणं, ततो हेतोर्मन्दाक्षाणाम-पटुदृष्टिनामपि लक्ष्या दृश्या। पृष्ठत्यात् तेऽपि तां पश्यन्तीत्यर्थः। शब्दमात्रेणात्र साम्यम्। छायाऽपि श्यामा प्रकृत्या। साऽपि च मन्दाक्षेण श्यामा। 'अप्रसूता भवेत् श्यामा, श्यामा रात्रिश्च कथ्यते' ॥८॥

---

1. B1, 8. स्थान. 2. B1, B2, 8. हंसस्यैव. 3. B1. हसिर्नर्म.

शस्ता न हंसाभिमुखी प्रवस्ते यात्रेति ताभिश्छलहस्यमाना ।

आह स्म नैवाशकुनिर्भवेन्मे भाविप्रियावेदक एव हंसः ॥९॥

हंसशब्दस्य सितच्छदसूर्यवाचित्वेनोभयार्थत्वादियं वक्रोक्तियुक्तिः। पुनःशब्दोऽत्र भेदे। सा भैमी ताभिः सखीभिश्छलेन वक्रोक्तिभङ्ग्या हस्यमाना नर्मविलसित-विषयतां नीयमाना सती आह स्मोवाच। कथं हस्यमानेत्याह। हे मुग्धे सखि! अन्यत् कथयामः। ते भवत्या हंसस्य सूर्यस्याभिमुख्येन यात्रा प्रयाणाख्या न शस्ता, न श्लाघ्या। सूर्यसन्मुखप्रस्थानस्यानिष्टफलदायकत्वात् शकुनशास्त्रेषु विशिष्य निषिद्धत्वात्। किमाह स्मेत्याह। हे सरलहृदया! एव हंसो मे मम नैवाशकुनीर्भवेद् दुर्निमित्तीस्यात्। अपि त्वेव हंसो भाविप्रियावेदक इति। एव हंस इति द्वयं भूय आवर्तते। भावि भविष्यत् प्रियमिष्टमावेदयति सूचयतीति भाविप्रियावेदकः। यदभिमुखीयात्रा निषिद्धा सोऽयं हंसो न भवति। अपि त्वन्य एवायं हंसो, यस्य शब्दश्रवणमपि प्रायेण महदभीष्टफलप्रदमि-त्यर्थः। अथ च यादृशोऽर्थः खलु भावी वर्तते दैवयो-[८५.७]-गात् तादृगेव वागस्या मुखाद् विनिर्ययौ। यथा - एष मम हंसो नैवाशकुनीर्भवेन्निन्द्यः पक्षी स्यादपि तु श्रेष्ठः। शकुनिर्मे नैवायं हंसः। यतः कीदृशः? भावो विद्यते यस्यासौ भावी रागवान्। स चासौ प्रियो नललक्षणस्तमावेदयति लम्भयतीति भाविप्रिया-वेदकः। अयं ममानुरागवन्तं प्रियं प्रापयिष्यतीति मम संबन्धी खल्वयं श्रेष्ठः शकुनिर्हंसः। शकुनिषु च हंसस्य प्रशंसा प्रसिद्धैव। शकुनाः कपिञ्जलादयः प्रस्थाने शुभसूचकाः, अशकुनाश्च तद् विपरीताः। उपचारेण तु शकुनाशकुनशब्दौ पूर्णकलश-छिंकादिषु वर्तेते। सामान्येन निमित्तमात्रवृत्तित्वात् तु शकुनशब्दस्य नपुंसक-त्वम्। अनशकुनमशकुनं भवेदशकुनीर्भवेदिति प्रथमः पक्षः। द्वितीयस्तु पक्षो यथा-

-अनशकुनिरशकुनिर्भवेदशकुनीभवेदिति। नाम्यन्तानां च्वावित्यादिना दीर्घः। अथवा अस्मिन्नपि पक्षे पक्षिपर्यायः शकुनिशब्द एव। केवलमयमत्र पुंवृत्तिशब्दवेदक इति ज्ञानार्थत्वाभावौ विदी। अन्यैरप्यन्यथापि यथामति यथासम्भवं व्याख्येयम्। सूर्याभि-मुखयात्रानिषेधस्तु यथा-'प्रत्यादित्यं प्रतिबुधं प्रत्यङ्गारकमेव च। अपि शक्रसमो राजा हतसैन्यो निवर्तते ॥९॥

हंसोऽप्यसौ हंसगतेः सुदत्याः पुरःपुरश्चारु चलन् बभासे।
वैलक्ष्यहेतोर्गमनानि तस्या अग्रेऽनुकृत्योपहसन्निवोच्चैः ॥१०॥

अपिर्विरोधे। प्रतिपाद्यमानस्यार्थस्य सम्भवात्। हंसो हि गतेनोपमानभूतम-हेलानां, तदङ्गे च भैम्या एव चारुत्वं युक्तम्। समुच्चये वा एष हंसोऽपि भैम्या अग्रतोऽग्रतश्चारु रुचिरं यथा स्यादेवं गच्छन् सन्, एवमित्थं चलन्ती वर्तत इति भैमीसंबन्धिनीं गतिमग्रे दृष्टिविषय एवानुकृत्य साहश्यं नीत्वोपहसन् विडम्बयन्[1] विराचयन् न विरेजे। किमर्थमेवं करोतीत्याह। वैलक्ष्यहेतोः। विलक्षो[2] विस्मयान्वितस्तस्य भावो वैलक्ष्यं वैकृतं, तस्य हेतुः कारणं, तस्मात्। वैलक्ष्यजनने गतिहरणमेव हेतुः। हंसस्य हि गतिस्तस्या दृश्यते। सा नूनं हंस-स्यैव हृता, प्रकारान्तरेणापि लब्धा। तथापि तस्यास्तुयां जनयत्येवासाधारणत्वात्। उच्चैरतिशयेनेत्यनुकृतिविशेषणम् ॥१०॥

पदे पदे भाविनि भाविनी तं यथा करप्राप्यमवैति नूनम्।
तथा सखेलं चलता लतासु प्रतार्य तेनाचकृषे कृशाङ्गी ॥११॥

सा तन्वङ्गी विलासवती तेन हंसेन तेन प्रकारेण लतासु सविलासं चलता सता प्रतार्य विप्रलभ्याचकृषे दूरं नीता। त-[65.b]-था कथमित्याह।

1. B2. विभवयन्निव रेजे. 2. 8. विलक्ष्यो.

यथा भविष्यति क्रमे क्रमे निश्चितं तं हंसशाव्यं वेत्ति, नूनमहमग्रेतने क्रमे एनं ग्रहीष्यामीति । भाविनीति साभिप्रायं कृशाङ्गीति च । रभसवशचलनेन तदा तद् वयस्यानुभूयमानत्वात् ॥११॥

रुषा निषिद्धालिजनां यदैनां छायाद्वितीयां कलयाञ्चकार ।
तदा श्रमाम्भःकणभूषणाङ्गीं स कीरवन्मानुषवागवादीत् ॥१२॥

तदा स हंसः कीरवच्छुक इव मनुष्यवचनो भूत्वा स्वल्वेनामवोचत् । कीदृशीम्? स्वेदजललवमण्डनमङ्गं यस्यास्ताम् । नितान्तस्वेदोद्गतसर्वाङ्गीणस्वेदोदबिन्दुकरम्बि-तामित्यर्थः । तदा कदेत्याह । यदा क्रोधविनिवारितसखीलोकत्वाच्छाया द्वितीया-मेकिकामतर्कयत् ॥१२॥

अये कियद्यावदुपैषि दूरं व्यर्थं परिश्राम्यसि वा किमर्थम् ।
उदेति ते भीरपि किं न बाले विलोकयन्त्या न घना वनाली: ॥१३॥

अय [इति] कोमलप्रश्ने । हे राजपुत्रि[1] ! कियद् यावद् दूरमुपैषि, कियन्तं भूभागं विप्रकृष्टमागच्छसि ? इति काकुगर्भम् । मातिदूरमागच्छेत्यर्थः । अथवा व्यर्थं प्रयोजनं विनैव किमर्थं कस्य कार्यस्य कृते खिद्यसे । निःकारणं मा खेदमा-वहेत्यर्थः । अथवा विःपक्षी तस्मै व्यर्थं पक्षिहेतोः[2] । किञ्च । हे न बाले ! मुग्धसखीके ! सान्द्राः काननराजीः पश्यन्त्यास्तव भयमपि नोत्पद्यते ? काक्वा अपि नु, भवत्या एवं भयमतीव युक्तमित्यर्थः । त्वं तावन्मुग्धा दृश्यस एव । तव सख्योऽपि मुग्धाः । प्रौढसान्निध्ये खलु बाला[3]ऽपि गहनं वनमाक्रमति, तच्च नास्ति । नु पाठे तु नुः सावेशे प्रश्ने । 'बाले' इति भैम्या एव सम्बोधनम् ॥१३॥

1. B2. राजन् 2. B2. पक्षिहतो, B. पक्षहेतोः. 3. B2, B. वलोऽपि-

वृथाऽर्पयन्तीमपथे पदं त्वां मरुल्लसत्पल्लवपाणिकम्पैः ।

सखीव पश्य प्रतिषेधतीयं कपोतहुङ्कारगिरा वनाली ॥१४॥

हे भैमि ! पश्येयं पिकहुङ्कृतिमती काननपङ्क्तिर्भवन्ती सखीव वारयतीव । कैः कृत्वा ? समीरवशाप्रकम्पमानकिसलयहस्ताभिनयैः । यतः कीदृशीं त्वाम् ? निरर्थकमेवामार्गे क्रमं ददतीम् । न हि मम ग्रहणे भवत्याः काचिद् विशिष्ट-मृष्टफललब्धिः । यथा - कामपि निरर्थकमेवोत्पथे पदं निधातुमिच्छतीमन्या हिततमा तत्सखी - मैवं विधेहीति - पञ्चशाखाभिनयैर्निवारयति तथेत्यर्थः। पश्येति सामान्योपक्रमे । यथा - 'पश्य, सिंहो धावति' ॥१४॥

धार्यः कथंकारमहं भवत्या वियद्विहारी वसुधैकगत्या ।

अहो शिशुत्वं [८८.ब] तव खण्डितं न, स्मरस्य सख्या वयसाप्यनेन ॥१५॥

अहो भैमि ! भवत्या कथंकारं कथं कृत्वा, केन प्रकारेणाहं ग्रहीतुं शक्यः । यतः कीदृशोऽहम् ? वियद्विहारी । अथवा वियद्विहारी सन्, अहं वियद्-विहरणशीलः । भूगतिस्तु मम प्रत्यक्षैव । सा चोपाधिरेव । वयं प्रायो विहंगमाः। त्वया तु वसुधायामेवैका गतिर्यस्यास्तया । त्वया खल्वहं वसुधायामपि मन्दं चलन्नपि धावन्त्यापि चेद्धर्तुं शक्यो नास्मि । ततो वियदुत्पत्य स्वैरं विहरन् कथं ग्राह्य इत्यर्थः । अहो चित्रमिदं । अनेन प्रत्यक्षतयोपलभ्यमानेन स्मरमित्रेण वयसा यौवनलक्षणेनावस्थाविशेषेणापि भवत्याः शिशुत्वं न खण्डितं, न कृत्तम् । अतिबालैव ह्येवमविचारमाचरति । त्वं च तरुणतरतारुण्या दृश्यसे । अथ च वयसा पक्षिणाऽपि न खण्डितं, चञ्चुपुटसम्पुटेन न कृत्तमिति । शिशुत्वेनात्रोपचारपर-म्परया कन्दलकिसलयादिकोमलं वस्तु लक्ष्यते । तद् हि अवश्यं नीडजेन खण्ड्यते ॥१५॥

सहस्रपत्रासनपत्रहंसवंशस्य पत्राणि पतत्त्रिणः स्मः।

अस्मादृशां चाटुरसामृतानि स्वर्लोकलोकेतरदुर्लभानि ॥१६॥

हे भैमि! स्मो वयं पतत्त्रिणः पक्षिण एव। किन्त्वीदृशाः पक्षिणः कीदृशा इत्याह। सहस्रपत्रं कमलमासनं यस्य स सहस्रपत्रासनो ब्रह्मा, तस्य पत्राणि वाहनभूता ये हंसास्तेषां यो [1]वंशोऽन्वयस्तस्य पत्राण्यपत्यानि वा। वंशानां चावश्यं पत्राणि दलानि भवन्ति। एतेन पदसमुदायेन साभिप्रायेणात्मन्यनेन पक्षित्वात् तिर्यक्त्वेऽपि महत्त्वमारोपितं, सन्ततब्रह्मभवनवासश्चात्मनः सूचितः। अत एवास्मादृशां महतां चाटूनि प्रियवचनानि तान्येव मृष्टतया रस इक्षुकाण्डा-
-दिजः। मृष्टत्वेन वा रसास्तान्येवामृतानि पीयूषाणि, स्वर्लोकस्य लोका देवा-
-स्तेभ्य इतरे नरनागादयस्तेषां दुर्लभानि। न हि देवभूयं विनामृतपानं घटते। स्म इत्यव्ययं वयमित्यर्थे, यथा अहमित्यर्थेऽस्मीति। तथा च—'दासे कृतागसि भवे-
-दुचितः प्रभूणां, पादप्रहार इति सुन्दरि नास्मि [2]दूये। उद्यत्कठोरपुलकाङ्कुरकण्ट-
-काग्रैर्यद्भिद्यते तव पदं ननु सा व्यथा मे। अथवा अस्मद्प्रयुज्यमान एवात्र [3]शेयः ॥१६॥

स्वर्गापगाहेममृणालिनीनां नालामृणालाग्रभुजो भजामः।

अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते ॥१७॥

ननु चेदेवं तर्हि भवतो हंसत्वमायातं, तच्च प्रत्यक्षतो बाध्यते। हंसा हि शुक्लत्वेन विश्वविदितास्त्वं च हारिद्रेण वर्णेन जात्यं सुवर्णमपि [4]जयन्नुज्ज्वा-
-[66.b]-गर्वि इत्याशङ्क्याह। वयमन्नानुरूपामदनीयाहैम्। तनोः शरीरस्य यद् रूपं चारुत्वं, तस्य ऋद्धिं सम्पदं बिभृमः। कीदृशा वयम्। नालाश्च मृणालानि च तद्भुजस्तदाहाराः। कासां ता नालास्तानि च मृणालानि चेत्याह।

---

1. B1, D. om. वंशो---दला-. 2. B1. दूरे. 3. Bz. शेषः. 4. B1, D. जयन्नुज्ज्वगेर्वि. - B1:-व्येति. interlinear.

स्वःसिन्धुकनककमलिनीनाम्। एतेन वयं सुवर्णं भुञ्जामहे[1] इत्युक्तम्। ननु यदि भवन्तो हेमाहारास्तत्कथं भवद्देहो हैम इत्याशङ्क्याह। कार्यं घटादि निदानात् मृदादेर्गुणानधीते, धर्मानादत्ते। कारणस्य गुणाः कार्ये सङ्क्रामन्तीत्यर्थः। [2]अधीत इत्यनेनात्यन्तसाम्यं दर्शितं गुणैः कार्यकारणयोः। ये हि गुरोः कारणस्य गुणास्त एव शिष्ये कार्ये सङ्क्रामन्ति। तथा चोक्तम्– "प्रायेण गुरुजनमनुशीलयन्ति शिष्याः" इति। कार्यकारणगुणादिविचारस्तु तद्विचारचतुरशास्त्रादवगन्तव्यः ॥१७॥

धातुर्निदेशादिह नैषधीयं लीलासरः सेवितुमागतेषु।
हैमेषु हंसेष्वहमेक एव भ्रमामि भूलोकविलोकनोत्कः ॥१८॥

ननु यदि ब्रह्मसदननिवासी भवांस्तत्किमर्थं पृथ्वीमध्यमवतीर्णवानित्याह। ब्रह्मण आदेशान्नलसंबन्धिक्रीडातडागमुपासितुमत्र भूमावागतेषु गाङ्गेयचक्राङ्गेषु मध्ये केवल-महं धरावलयदर्शनोत्कण्ठितः पर्यटामीति। भूयो हंसागमनहेतुं मह्यां जलकेलितडाग-मुद्भावयता तस्य महत्त्वं सूचितम् ॥१८॥

विधेः कदाचिद्भ्रमणीविलासे श्रमातुरेभ्यः स्वमहत्तरेभ्यः।
स्कन्धस्य विश्रान्तिमदां[3] तदादि श्राम्यामि नाविश्रमविश्वगोऽपि ॥१९॥

[4]अहं तदादि तद्दिनमारभ्य अविश्रमेणाविलम्बेन विश्वं गच्छाम्यविश्रमविश्वग, एवं भूतोऽपि न श्राम्यामि, न खेदमावहामि। तदादि किमादीत्याह। यदादि स्वल्पाहं स्कन्धस्यांसस्य विश्रान्तिं संवाहनमदां[5] दत्तवानस्मि। केभ्यः? स्वमह-त्तरेभ्यः, 'प्रकृष्टमहान्तो महत्तरास्तेभ्यः' इति शिविकावाहादिगतलोकोचित-समाश्रयणम्। कीदृशेभ्यः? श्रमातुरेभ्यः खेदाभ्यां तेभ्यः। क्व सति? कस्मिन्नपि काले भ्रमणीविलासे इतस्ततो विचरणविनोदे। कस्य? विधेर्ब्रह्मणः।

---

1. B1. भुञ्ज्महे. D. भुञ्जाहे. B2. om. अधीत ---- इति. 3. D. –महाचरादि.
4. B2. om. अहं ---- श्राम्यामि. 5. D. –महादृत–.

कदाचिद् ब्रह्मा केलिरासेन निजभुवनं भ्रमितुमुद्यतोऽभूत् तत्रास्मद् ज्येष्ठा वाहनी-
-भूतास्त्वरितमितस्ततो धावन्तः श्रान्तास्ततो मध्ये प्रविश्य, यथा ज्येष्ठं क्वचित्
क्वचित् तान् विश्लेष्य मया निजः स्कन्धस्तत् स्कन्धधुरायां सङ्क्रमितस्ततस्तै-
-स्तुष्टैर्मे वरो दत्तो "वत्स, त्वमेतद्राधविश्रमेण विश्वमपि गच्छन्न खलु श्रमिष्यसीति ॥१९॥

बन्धाय दिव्ये न तिरश्चि कश्चित् पाशादिरासादितपौरुषः स्यात् ।

[1] एकं विना मादृशि तन्नरस्य स्व-[67.b]-र्भोगभाग्यं विरलोदयस्य ॥२०॥

ननु त्वमेवमनवरतं विश्वं भ्राम्यन्नपूर्वरूपत्वाद्यथाकथंचिद् यदि केनापि गृह्यसे,
तदा किं करोषीत्याशङ्क्याह । मयि दिव्ये तिरश्चि स्वर्गीये पक्षिणि कश्चित् पाशावेष्ट-
-कादिरासादितपौरुषो दर्शितनिजशक्तिर्न स्यात् । किमर्थम्? बन्धाय ग्रहणाय । 'अहं
तिर्यङ्ऽस्मि परं दिव्य' इति महिमदर्शनपरम् । कथम्? विना ऋते । किं तत्?
तत् स्वर्भोगभाग्यम् । स्वर्गोपभोगार्हं शुभं कर्म । कस्य? नरस्य । कीदृशस्य? विरलः
क्वचित् क्वचित् भवो, न सार्वत्रिक, उदयः शोभनं जन्म यस्य । एकेनैव पुण्यवता
स्वर्भोगार्हेण पुरुषेण केवलमहं गृह्ये, न च तादृशः प्रायोऽस्ति । अथ च विगतो
रस्य रेफस्थाने रे रेफे वा लस्य लकारस्योदयः सद्भावो यस्य । नलेति नाम्नि
यस्य स्थाने पूर्वं लकारोऽभूदित्यर्थः । नलेन केवलं तादृक् स्वर्भोगयोग्यं शुभं
कर्मार्जितमस्ति, येन वयं बद्ध्वा स्वत्यिदानीताः स्म इत्यर्थः । तदित्यनिर्वचनीयम् ॥२०॥

इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः ।

महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ॥२१॥

ननु स्वर्गभोगार्हमपि कर्म जन्मान्तर एव भुज्यत इत्याशङ्क्याह । इष्टेन यागादिना
पूर्तेन खातादिना वश्या आयत्ताः सन्तो, देवाः स्वर्गसुखमिहापि नलस्य सृजन्ति घटयन्ति ।

---

1. B1, B2, Ø.--बध्नाति नस्तन्विपरं तन्नरस्य. B1. एकं विना मादृशि -*interlinear*.

एतदर्थदृढीकरणक्षमं वस्त्वन्तरमुपन्यस्यति । यतो महीरुहा वृक्षा बकुलादयो दोहदस्य वाञ्छितस्य युवतीगण्डूषसुरादेर्यः सेकः सेचनं, तस्य शक्तिः प्रभाव-स्ततो हेतोराकालिकमनार्तवं कोरकमुद्गिरन्ति कालकं प्रकटयन्ति ॥२१॥

सुवर्णशैलादवतीर्य तूर्णं स्वर्वाहिनीवारिकणावकीर्णैः ।
तं वीजयामः स्मरकेलिकाले पक्षैर्नृपं चामरबद्धसख्यैः ॥२२॥

ननु भवत[1] स्त्विह या तेषु कस्तस्य स्वभोगो भवेदित्याह[2] । वयं तं नृपं वीजयामः सुखयामः । तालवृन्तवातनिर्वृतिं[3] कुर्मः । कदा ? स्मरकेलिकाले सुरतक्रीडाऽवसरे । कैः कृत्वा ? पक्षैः पत्रैः । कीदृशैः ? प्रकीर्णकनिभैः । पुनः कीदृशैः ? स्वर्नदीजललवार्द्रैः । किं कृत्वा वीजयामः ? कनकाचलात् त्वरितमव-रुह्य । अन्योऽपि कश्चित् प्रभुः सुरतादिखेदग्लानदेहः समीपवर्तिदासीजनेन प्रकीर्णकं मायूरमुत्क्षेपकं वा जलधानीस्थानं प्राप्य, जलैरभिषिच्यार्द्रमेव गृहीत्वा त्वरितमागत्य वीज्यते । वीजनमुत्क्षेपणम् । सुवर्णशैलादित्यादि सर्वं साभिप्रायम् ॥२२॥

क्रियेत चेत्साधुविभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया ।
या स्वौजसां साध-[67.b]-यितुं विलासैस्तावत् क्षमानामपदं बहु स्यात् ॥२३॥

विशिष्य स्वर्गसुखयोग्यतामाह । यदि केनापि साधूनामुत्तमानां विभक्ते-र्निर्धारस्य चिन्ता विचारः क्रियते, अत्र के के साधव इति निर्धारयितुं प्रस्तूयते, तदा तस्मिन्नवसरे सा नललक्षणा व्यक्तिः । पुल्लिङ्गाख्या मूर्तिर्वा प्रथमा आद्याऽभिधेया वाच्या भवति । तदा प्रथमं नल एव साधुत्वेनोच्यत इत्यर्थः) सर्वेषां साधूनां मध्ये सङ्ख्याद्यं तस्यैव प्रथमा गणनेति यावत् ।

---

1. B1. भवस्त्विह. 2. B1. भवेदित्याशङ्क्याह. 3. B2. B1. -निर्वृतं.

सा केत्याह। या साधयितुं निष्पादयितुं स्यात् भवेत् घटेत। किं साधयितुं युक्ते-
-त्याह। पदं स्थानम्। किं नामपदं तदाह। क्षमा नाम पृथिवीसंज्ञकम्। कैः प्रयोज्यैः
कर्तृभिः विलासैर्विजृम्भितैः। केषाम्? स्वौजसाम्। स्वस्य आत्मन ओजांसि प्रौढ्यस्तेषाम्।
कियत्प्रमाणं पदमित्याह। यावदनन्तमित्यर्थः। पदं सिध्यति तत् सिध्यत्। विलासाः
प्रयोज्या साधयन्ति। तांश्च नलः प्रयुङ्क्ते एवं सति नलः स्वौजसां विलासैः पदं
साधयतीत्युक्तिः स्यात्। यथा गुरुः शिष्येण शब्दान् साधयतीति। 'शिष्यान्' क्वचिद्
द्वितीयापि स्यात्। अत्र त्वनुक्ते कर्तरि तृतीयैव विवक्षिता। इह च सिध्यते-
-रपारलौकिके आत्वम्। साध्यतेरेव वा प्रयोगः। साध्यति क्षमानामपदं तत्
साध्यत्। स्वौजसां विलासाः प्रयुञ्जते, तानपि नलः प्रयुङ्क्ते।

अथ चार्थान्तरम्। येषु हि साधुसम्यग्विभक्तीनामर्थात् स्यादीनां प्रथमा-
-द्वितीयादीनां चिन्ता विचारः क्रियते, का विभक्तिः किमर्थं वक्तीति विवेचनं
प्रारभ्यते, तदा सा व्यक्तिः स्त्रीपुंनपुंसकलक्षणा प्रथमाभिधेया भवति। प्रथमा-
-विभक्तिलिङ्गार्थं वक्ति। प्रथमयाभिधीयत इति प्रथमाभिधेया। अव्यतिरिक्ते
लिङ्गार्थवचने प्रथमाविभक्तिर्भवतीत्यर्थः। सा का व्यक्तिरित्याह। या व्यक्तिस्तावत्
क्षमा समर्था। किं कर्तुम्? साधयितुं व्युत्पादयितुम्। किं तन्नामपदं नामरूपं पदं
नामपदम्। अन्यदपि ह्याख्यातपदमस्ति। तावत् किमित्याह। यावद् बहु स्यात्।
बह्वर्थवाचकरूपं भवेत्। कैः? प्रयोज्यैः कर्तृभिः विलासैर्विधानैः। सस्य विसर्गः
औकारे औ ओकारे च। जसि दीर्घ ( ) इत्यादिभिः। केषां विलासैरित्याह।
स्वौजसां सुश्च औश्च जश्च, तेषां स्वौजसां प्रथमैकवचनद्विवचनबहुवचनानाम्।
लिङ्गार्थे ह्येतावत्येव शक्तिर्यत् स्वमाश्रित्योत्पन्नानां स्वौजसां विधिविशेषैः
प्रयोज्यैः कर्तृभिर्नामपदं तावदेव साधयति। यावद् बहु स्यात्। वृक्षः वृक्षौ वृक्षाः।

कुण्डं कुण्डे कुण्डानि। कुमारी कुमार्यौ कुमार्यः। एवं रूपभेदात्। [६४.७] एकः द्वौ बहव एवं रूपाणि जनयितुं व्यक्तेः शक्तिः। अन्यत्र तु कर्माद्यर्थविवक्षायां विहितानां द्वितीयादीनां शक्तिरित्यर्थः। अत्र व्याख्यानपक्षे तावच्छब्दोऽवधौ। अन्यदपि व्याख्यानान्तरं विमृश्यं सुबुद्धिभिः। पाणिनीयशास्त्रे प्रथमैकवचनस्य सुसङ्केतेन व्यवहारः। तं हि प्रथमैकवचनं 'सु' इत्याचक्षते ॥२३॥

राजा स यज्वा विबुधव्रजत्रा कृत्वाध्वराज्योपमयैव राज्यम्।
भुङ्क्ते श्रितश्रोत्रियसात्कृतश्रीः पूर्वं त्वहो शेषमशेषमन्त्यम् ॥२४॥

'नैषधीयं लीलासर' (नै.३.१८) इत्यनेन तस्य पूर्वं प्रदर्शितमेव। इदं प्रदर्शयति। स राजा राज्यं भुङ्क्ते, सप्ताङ्गाधिपत्यमुपयुनक्ति। कीदृशः सः? यज्वा विधिवद् यज्ञकृत्। किं कृत्वा भुङ्क्ते इत्याह। विबुधा विविधविद्याविदस्तेषां व्रजः समूह-स्तस्मै देयं कृत्वा। पार्श्वतो वर्तमानेभ्यः सर्वेभ्यो गुणिभ्यो विधिवन्निवेद्ये-त्यर्थः। कथा कृत्वा? अध्वरो यागस्तत्र यदाज्यं हविः सैवोपमा साम्ययोग्यं वस्तु तया। यथा यज्ञहविर्विबुधव्रजत्रा कृत्वा भुङ्क्ते समश्नाति। अत्र चैवम्। विबुधा देवास्तेषां व्रजाः सङ्घास्तेभ्यो देयं कृत्वा। देवा हि सहचारिणः। अत्रार्थे च यज्वताहेतुः। कीदृशः श्रिताः सेवकाः, श्रोत्रियाश्छान्दसाः षट्कर्मकृतो द्विजा-स्तेषामायत्ता कृता श्रीः सुवर्णादिसम्पद्येन सः। अत्र च श्रितानां पूर्वनिर्देश-स्तेषामवश्यभर्तव्यत्वात्। राज्याध्वराज्ये सामान्येन भुक्तेन हि तत्र विशेषोऽस्ति। वाक्यपाठक्रमेण वाक्यार्थपरिणामक्रमेण वा यत् पूर्वमाज्यं तच्छेषं देवभुक्तावशि-ष्टममृतसंज्ञं भुङ्क्ते। यथैव ह्ययमध्वराज्यं भुङ्क्ते तथैव राज्यं भुङ्क्ते। अन्त्यं द्वितीयं राज्यमशेषं समस्तमनन्यसाधारणं भुङ्क्ते। शेषाशेषशब्दार्थकृत एवात्र विशेष इत्यर्थः। भुङ्क्ते इत्यशन एवात्मनेपदम्। तच्च राज्यपक्षेन सङ्गतम्।

[1]ततोत्तरं राज्यमपि भक्षितवानेव सः। तथा च लोकोक्तिः। 'अनेन लक्ष्मीर्भक्षयित्वा क्षिप्ता' इति। 'अनेन लक्ष्मीर्दन्ततले दत्त्वा चर्वित्वा क्षिप्ता' इत्यादि च। दृश्यते चैवमन्यत्रापि। 'बुभुजे पृथिवीमेव केवलाम्' इत्यादि। अत्रोपयोग उपचारेण [2]भक्ष्यत्वेन विवक्षितः ॥२४॥

दारिद्र्यदारिद्र्यविणौघवर्षैरमोघमेघव्रतमर्थिसार्थे।
इष्टानि सन्तुष्टमिवेष्टदेवं नाथन्ति के नाम न लोकनाथम् ॥२५॥

तं नलमिष्टानि के न नाथन्ति। अपि तु सर्व एव तं कामितानि याचन्त इति काक्वा। यदि विवर्णीभूय दास्यतीत्याह। कीदृशम्? [६४.८] सन्तुष्टम्। प्रसन्न-मुखत्वादिना वित्तचित्तहर्षमित्यर्थः। ननु सर्वेषामभीष्टं पूरयितुं कथमिव स समर्थ इत्याह। यत इष्टदेवं, इष्टा यज्ञैः [3]प्रीणिता देवा येनेति सर्वार्थसिद्धिसूचनम्। पुनः कीदृशम्? अमोघमेघव्रतम्। अमोघमेघस्य व्रतं नियमो यस्य तम्। क्व? अर्थिसार्थे मार्गणगणे। कैः? दारिद्र्यं दारयन्त्येवंशीलास्ते च ते द्रविणौघाः कनक-राशयस्तेषां वर्षाणि वृष्टयस्तैः। स नलः सदोन्नतकराभ्रः शक्र इव याचकचये कनकामूल्यधनवरत्नमुज्झतीत्यर्थः। नाथिरत्र द्विकर्मकः। 'ओघो वृन्देऽम्भसां रये' ॥२५॥

अस्मात्किल श्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य।
तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥२६॥

सौन्दर्यं विना खल्वेते गुणा मादृशीनामनुपयुक्ता एवेति। तदतिशयमाह। किलेति सम्भावनायामागमैकदेशसम्भावने वा। सा सौन्दर्यातिभूमितया प्रसिद्धा रम्भानाम नाकनारी, तस्य नलस्य नामगन्धादाख्यालेशान्नलकूबरं नाम कुबेरतनयं भेजे। [4]अचकमत। तस्य नलस्य नाम नलेत्यक्षरद्वयरूपमभिधानं, स एव गन्धः परिमलगुणो यस्तस्मात्।

---

1. B1. ततोक्तं. 2. B1. D. भक्षत्वेन. 3. B1, D. प्रणीता, B2. प्राणीत. 4. अचकमत – ? (B1, B2, D).

तन्नाममात्रादित्यर्थः। गन्धो हि गुणः। स च द्रव्याश्रितो भवति। विशेषणत्वात् तस्य च पूर्वनिपातः। 'विशेषणं पूर्वम्' इति न्यायात्। अयं च न्यायो युक्तिसिद्धः। सा चेयं युक्तिर्नागृहीत विशेषणा[1] विशेष्ये बुद्धिरिति। अत्र च नलशब्देनोपलक्षितः कूबरो नलकूबरः। नलश्चासौ कूबरश्चेति यावत्। किं कृत्वा भेजे इत्याह। तत्र च नलेऽनुरक्ता रागवती सती समनाय्य। किं कृत्वा तत्रानुरक्तेत्याह। अस्मत् सकाशान्नलस्यातुलां सर्वातिशायिनीं भां कान्तिं श्रोत्रयोरमृतं कृत्वा। सुधामयाक्षरमयीमिव सादरं श्रुत्वा। प्रलोभनमेतत् ॥२६॥

स्वर्लोकमस्माभिरितः प्रयातैः केलीषु तद्गानगुणान्निपीय।

हा हेति गायन् यदशोचि[2] तेन नाम्नैव हाहा हरिगायनोऽभूत् ॥२७॥

हरेरिन्द्रस्य गायनो गन्धर्वस्तेनैव कारणेन नाम्ना कृत्वा हाहा अभूत्। तस्य हि हा हा इति नामार्थान्तरनिमित्तं यदुच्यते तन्नास्त्येव। तेन केनेत्याह। यत् कारणात् स गायन् गीतं कुर्वन् सन् अस्माभिरशोचि। 'वराकोऽयं गातुं न जा-[61-B]-नाति किमित्यात्मानं चिरगोपयतीति हा हाः। तत् तथा नैव अपि तु हा हेति निन्द्यार्थमेवेदम्। वीप्सितमव्ययपदद्वयमस्मदध्यारोपितमेव। अस्माभिः कीदृशैः? इतो भूलोकात् स्वर्लोकं प्रस्थितैः? किं कृत्वा? तस्य नलस्य गानगुणान्निपीय गीतविशेषानतिभृतं श्रुत्वा। कासु? केलीषु, कामसुखसमयेषु। एतेन तस्य गुणगणगाननिपुणगायनोत्कर्षकथनेन श्रु[3]...॥रित्यवकथनम्। केलीषु वा स्वयमस्य गायन एवं वर्णनेन गानकलाकौशलसूचनम् ॥२७॥

शृण्वत्सदारस्तदुदारभावं हृष्यन्मुहुर्लोम पुलोमजायाः।

पुण्येन नालोकत नाकपालः प्रमोदबाष्पावृतनेत्रमालः ॥२८॥

---

1. B2.—विशेषो. 2. B2. तत्. 3. पद.

इन्द्र इन्द्राण्या लोम भूयो भूयो हृष्यत् कण्टकीभवत् पुण्येन नापश्यत्।
स प्रागुच्छचीतनूरुहं[1] यच्छक्रेण न दृष्टं चक्रे। तत्र तस्या महत् सुकृतं हेतु-
-रित्यर्थः। यतः कीदृशः सः? हर्षाश्रुभिः पिहिता दृशां दशशती यस्य स तथा।
किं कुर्वन् सः? तस्य नलस्यौदार्यं सह दारैः[2] शृण्वन् सन्। अर्थादस्मन्मुखात्
[3] रहसि वामाङ्कावस्थितकलत्रः सन्निकृष्टो यदाऽस्मन्मुखाद् वर्ण्यमानं नलस्यौदार्यं
शृणोति, तदा तस्य हर्षान्नेत्रसहस्रं तज्जैर्जलैः पिधीयेत न चेन्नलौदार्यश्रवण-
-हर्षितं शचीतनूरुहं पश्येत्। ततस्तामीदृगवस्थाम् 'असतीयम्' इति तर्कयित्वा
निगृह्णीयात्। तददर्शने च शच्याः पुण्योपचय एव हेतुः। पुलोमजेति साभिप्रायम्।
पुलोमा (पुलोमन्) नाम स दैत्यस्तज्जाया हि सती, तत् तनयाऽपि तथैव दैत्य-
-जायाः किल सर्वाः साध्व्यास्तद् बलप्रभावात् तद् विजय इति ॥२८॥

सापीश्वरे शृण्वति तद्गुणौघान् प्रसह्य चेतो हरतोऽर्धशम्भुः।
अभूदपर्णाङ्गुलिरुद्धकर्णा कदा न कण्डूयनकैतवेन ॥२९॥

सा खल्वपर्णाऽपि यया भगवत् प्राप्तये तपः साधयन्त्या पर्णान्यपि
शरीरयात्रातां न नीतानि एतादृशी [4]सतीरत्नकण्डूयनमिषेण कदा करशाखापिहित-
-श्रुतिर्नाभूत्। कदा? भगवति भवानीपतौ तस्य नलस्य गुणानां विविधान् भेदा-
-नाकर्णयति सति। किं कुर्वतस्तानित्याह। प्रसह्य हठाच्चेतोऽन्तःकरणं हरतः
समाकृष्य स्ववशीकुर्वतः। ननु तत्र तत्कथं तस्याः सान्निध्यं, कथं च चेतोहरण-
-हेतुश्रवणमित्याह। या किम्? या अर्धशम्भुः। अर्धं च सा शम्भुश्चार्धशम्भुः।
अतो दम्पत्योरेवमवस्थितयोः सममेव श्रवणम्। ननु श्रवणमेवं निषिद्धं मूर्ति-
-मतोऽङ्गस्य स्त्रीपुंभेदेन द्विधा दृश्यमानत्वात्। मनसस्तु द्वैविध्यमसम्भवि परमा-[६५.ब]
-णुरूपतयाऽनंशत्वादित्यादिविचारपरिणतार्थसमर्थने तु नाहं समर्थः ॥२९॥

1. B1. -चमीतभू- 2. B2 सदा दारैः 3. B1, 8. रहसि- 4. B1, 8. -रत्नं.

अलं सजन् धर्मविधौ विधाता रुणद्धि मौनस्य मिषेण वाणीम्।
[1]तत्कण्ठमालिङ्ग्य (-मालम्ब्य) रसस्य तृप्तां न वेद तां वेदजडः स वक्राम्॥३०॥

ब्रह्मा धर्मविधौ सन्ध्योपासनलक्षणे अत्यर्थं सजन् संसक्तो भवन् मौनस्याभाषणस्य व्याजेन सरस्वतीं रुणद्धि, निर्गन्तुं न ददाति किल। इयं गुणलुब्धा गत्वा नलं मा भजेदिति विधिर्निजकलत्रं गिरं मौनव्याजेन निरुध्य स्थापयति। तस्य च त्यागहेतुः पत्यन्तरसमाश्रयणे हेतुश्च तस्या वृद्धत्वं पत्युः प्रसिद्धमेव। अथवा एवंरूप[2]हेतावुत्प्रेक्ष्यमाणे नलस्य गुणविशेषो वर्णितः स्यात्। तस्माद् ब्रह्मणो महत्त्वहेतुषु सत्स्वपि तं रागेण हित्वा गीः आश्रितुमिच्छतीति निरुणद्ध्येव[3] तां स इति युक्तम्। स एवं विचेष्टते परं स वेदपाठात् सञ्जातजाड्यस्तां वक्रां धूर्तां[4] वञ्चनचतुरां न वेद। यतः कीदृशीं ताम्? रसस्य सम्भोगशर्मणस्तृप्तां प्रीताम्। किं कृत्वा? तस्य कण्ठमालम्ब्य बाहुभ्यां गृहीत्वेति छेकोक्तिः। तत्त्वतस्तु वक्रां वक्रवर्णार्थग्रथनरूपाम्। तस्य नलस्य कण्ठवर्णस्थानप्रधानमालम्ब्याश्रित्य धृत्वा रसस्य शृङ्गारादिगतस्थायीभावस्य माधुर्यस्यैव वा[5] तृप्तां न वेद। स खलु नलः सरसवक्रभणितिनिपुणः। अन्योऽपि छान्दसोऽर्थज्ञानरहितवेदैकपाठजडत्वादेवं गुणविशिष्टां निजजायां न जानाति। स्वत्यागपुरःसरपरपुरुषभजनशङ्कया मिषेण वृथैव तामवरुणद्धि। अलं वृथैव तां रुणद्धीति वा व्याख्येयम्। सजन्निति षञ्ज सङ्गे शतृ अन्तः दंशि सञ्ज्यनुषङ्गलोपः। रसस्य तृप्तामिति सम्बन्धविवक्षयैव षष्ठी, न तु पूरितार्थ[6]विहितसूत्रेण। वक्रोक्तेर्लक्षणं यथा— 'प्रस्तुतादपरं वाच्यमुपादायोत्तरप्रदः। भङ्गश्लेषमुखेनाह यत्र वक्रोक्तिरेव सा'।

1. B2, 8. न वेद तां वेदजडः स वक्रां तत्कण्ठमालिङ्ग्य रसस्य तृप्ताम्॥ 2. B2, 8. -स्वय- 3. B1, 8. निरुणद्ध्येवं. 4. B2, 8. धूर्तां. 5. B2, 8. चा. 6. B1. पुरितार्थ—

यथा—"नाथ मयूरो नृत्यति, तुरगाननवक्षसः[1] कुतो नृत्यम्। ननु कथयामि कलापि-नमिह सुखलापी प्रिये! कोऽन्यः!" किञ्च—"के यूयं[2] स्थल एव सम्प्रति वयं प्रश्नो [3]विशेषाश्रयः, किं ब्रूते स विहङ्गमः, स च फणी, यस्यावतारो इति। वामा यूयमहो [4]विरस्य रसिकप्रागल्भ्यभु[5]ज्जागरं येनास्मासु विवेकशून्यमनसः[6] पुंस्येव[7] योषिद्भ्रमः" ॥३०॥

श्रियस्तदालिङ्गनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः।
समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाणु[8]नापि ॥३१॥

लक्ष्म्या नलाश्लेषजास्तो कापि साध्व्या व्रतस्य हानिर्नाभूत्। तस्या भर्तु-[नलस्य]-र्विष्णोरप्यसूयामलिनलवेनापि न भूतं, न सम्पन्नमिति भावे। कुत इति तत्र द्वये हेतुमाह। कथा? समस्तानि च तानि भूतानि च समस्तभूतानि, सर्वे प्राणिन-स्तेषामात्मा, क्षेत्रज्ञश्चेष्टकस्तस्य भावस्तथा। अत्रापि तद्भर्तुरेवेति सम्बन्धः। सर्वेषां भूतानां शरीरान्तर्वर्तीः यः स्वल्वात्मा स भगवान् विष्णुरेवेति श्लोकस्तौ। तच्चलस्तु श्रीः कान्तिः सम्पच्च ॥३१॥

धिक् तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि पूर्ण[9]मिन्दुम्।
मन्ये स विज्ञः स्मृततन्मुखश्रीः कृतार्धमौज्झन्भवमूर्ध्नि यस्तम् ॥३२॥

इदानीं किमपि विशिष्य वर्णयति। ब्रह्मणस्तं पाणिं[10] हस्तं धिक्, तं धातृकरं निन्दयामः। तं कमित्याह। यः पूर्णिमायां सम्पूर्णकलां विधुं विधत्ते। नन्वेवं सति कथं तस्य कुत्सनमिति विशेषणद्वारेण निन्दाहेतुमाह। कीदृशम्? अजातलज्जमनु-द्भूतत्रपम्। स एकः करः सुष्ठु निन्द्यः। न तु द्वितीयः। किमित्याह। मन्ये जानामि स करो विज्ञः कुशलो यः स्मृता ध्याता तन्मुखस्य नलास्यस्य श्रीः शोभा येन।

---

1. B2. पुरगा-, 2. B2. केयूरं यं, 3. B1, 8. -श्रियः 4. B2. वरस्य. 5. B1. om. -ग- 6. B2. -मनसा. 7. B1, B2, 8. पुंस्येव. 8. B2. -गुणानपि. 9. B2, 8. पूर्णि- 10. 8. om. -पाणिं हस्तं.

स [1] एवंभूतस्तमिन्दुं कृतार्धं सामिघटितं भवमूर्ध्नि कपालिशिरसि तत्याज। तन्मु-खस्मरणमुभयत्र संबन्धनीयम्। एकस्यापि धातुर्दक्षिणकरस्य कालावस्थादिभिर्यद् भेदः। उभयावस्थस्य चन्द्रस्य दृश्यमानत्वादित्थमूहो गम्यः ॥३२॥

निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः।
सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ॥३३॥

अत्रापि गम्या सम्भावना। इन्दुर्नलमुखमस्माकं मुखात् स्वस्य जयनशीलं श्रुत्वा लज्जाविह्वलः सन् सूरे सूर्ये निलीयते। अमावास्यायां गत्वा गुप्तीभूय तिष्ठति। कदापि वास्तवाव्याख्येन समुद्रजलराशौ। कदाचिच्च वर्षाकालादौ गगन-तलतलसज्जलदपटलोदरे। अभ्रं खं तत्र भ्रमन्ति यान्यभ्राणि मेघास्तेषां गर्भो मध्यम् ॥३३॥

संज्ञाप्य नः स्वध्वजभृत्यवर्गान्दैत्यारिरत्यब्जनलास्यनुत्यै।
तत्सङ्कुचन्नाभिसरोजपीताद्धातुर्विलज्जं रमते रमायाम् ॥३४॥

दैत्यारिर्भगवान् विष्णुर्धातुः सकाशाद् विलज्जं गतत्रपं यथा स्यादेवं रमायां श्रियां रमते, सुरतसुखमुपलभते। ननु नाभिकमलनिलयत्वाद्धातुः सांनिध्येऽपि। कुत एवमित्याह। किं कृत्वा? नोऽस्मान् संज्ञाप्य हस्तादिचेष्टया निभृतं व्यापार्य। किमर्थम्? अब्जमतिक्रान्तमत्यब्जं पराजितसरसिजं यन्नलस्यास्यं तस्या नुतिः प्रशंसा, तस्यै। अत एव कीदृशात्? तया श्रुत्वा सङ्कुचन्निमीलद् यन्नाभि-सरोजम्। तेन पीतान्[2]मध्यगतीकृताददृष्टतां नीतादित्यर्थः। ननु तत्र कथं भवत्-सन्नि-[70.b]-धानं, येन खल्वेवं संविधानकं स्यादित्याह। कीदृशान्? नः स्वस्यात्मनो ध्वजो वाहनं गरुडस्तस्य भृत्यवर्गान् सेवकपक्षान्। सजातीयसमूहो वर्गः। गरुडः सततं तस्य ध्वजत्वात् स नीडचरस्तस्यापि युक्त्या वयं ध्वजाः

1. ö. एवं भूतः संस्तमिन्दुं. 2. B2. -मध्यभागीती-

सर्वकालमनालस्यास्तदुपवर्तिनस्ततो गरुडे कृत्यान्तरनियुक्तेऽपि वयं भगवतः सदा नित्याहीं सेवां कुर्मस्तत्र कदाचिद् यदि भगवान् विष्णुः[1] श्रियं सम्भोक्तुमिच्छति, तदापि तामहः सन्निहितस्तन्नाभिसरसिरुहकुहरगृहः। ततो भगवानस्मान् संज्ञापयति[2] विजित-समस्ताङ्गं नलवदनकमलं स्तूयतामिति। ततोऽस्मासु तथा कुर्वाणेषु सत्सु विपक्षस्तुतिविलक्ष्यं तन्नाभिसरोजमञ्जसा सङ्कुचति एवं ब्रह्मा न दृश्यते। तत-स्तत्र त्रपाया अभावः। ततस्तु स्तुत्यं रतिसुखं भगवान् कमलया सममनुभवतीति॥३४॥

रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः।

चतुर्दशाष्टादश चात्र विद्या द्वेधापि सन्तीति शशंस वेधाः॥३५॥

ब्रह्मा स्वल्वेवमसूचयदिव। एवं किमित्याह। अत्रास्मिन्[3] द्वेधापि द्विधापि विद्याः सन्ति। तदेव द्वैविध्यमाह। कति विद्याश्चतुर्दश चाष्टादश च। द्वौ चकारौ गौण-मुख्यभावं निरस्यतः। अत्र क्वेत्याह। अस्य नलस्यास्ये मुखे। कस्माच्छशंस[4]? गणनात्। सङ्ख्यानपूर्वम्[5]। काभिर्गणनादित्याह। रेखाभिर्लेखाभिः। क्व वर्तमानाभिः? अन्तर्मध्ये। अर्थान्मुखस्यैव। कीदृशीभिः? दन्तमयीभिर्दशनरूपाभिः। कतिभिरित्याह। द्वात्रिंशता द्वादशाधिकया विंशत्या। अत्र केचन विद्याश्चतुर्दश प्राहुः। केचिच्चाष्टा-दश। अत्र तु प्रकारद्वयेनापि विद्या वर्तन्त इत्यर्थः। इवशब्दो भिन्नक्रमः। शंसति[6] स चेति शशंस वेत्यत्र संविधमानः[7] सकलं वाक्यं द्योतयति। अष्टादशाभ्यः सङ्ख्या सङ्ख्येये ततःपरं सङ्ख्याने सङ्ख्येयैव च॥३५॥

श्रियौ नरेन्द्रस्य निरीक्ष्य तस्य स्मरामरेन्द्रावपि न स्मरामः।

वासेन सम्यक् क्षमयोश्च तस्मिन् बुद्धौ न दध्मः खलु शेषबुद्धौ॥३६॥

---

1. B1, 8. द्विलु. 2. B2, 8. संज्ञपयति. 3. B1. अथ. 4. B1, 8. -च्छन्नांस.
5. B2. ख्यातरूपं. 6. B2. सर्वो न शंसे वेत्यत्र. 8. स चेति शशंसे. 7. B1. 8. सम्बध्यमानः

तस्य नलस्य श्रियौ कान्तिसम्पदौ विचार्य, कामशक्रावपि न चित्तमवतारयामः। श्रिये हि श्रीयौ तावेव सर्वातिवर्तिनौ। तावपि न स्मराम इत्यन्येषां कथैव का। किञ्च तस्मिन् नृपे क्षमयोर्भूमितिलिक्षयोः सम्यग्वासेन [1]यथावस्थितया करणेन हेतुना वा। खलु नूनं शेषबुद्धावप्यनन्तसर्वज्ञौ तौ बुद्धौ न [2]रुन्धः। मतिस्तद्विषयिणी नैव नो भवतीत्यर्थः। नलपक्षे पृथ्वीधारणं न्याय्ये वर्त्मनि स्थापनम्। पृथ्वी च पृथ्वीगता जनाः। पक्षे वासो भावना वा। [71.8] यथासङ्ख्योऽलङ्कारः। शृङ्गार--शान्तरससूचनम् ॥३६॥

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः।

मनोभिरासीदनणुप्रमाणैर्न [3]लङ्घिता दिक्कतमा तदश्वैः ॥३७॥

इदानीं वीर(र्य)माह। तस्य नलस्याश्वैः कतमा दिग् लङ्घिता नासीत्? अपि तु, सर्वा दिशः पृष्ठपक्षे क्षिप्ताः। यैः किं वस्तुभिरित्याह। साक्षाद् गरुडैरेव, केवलमेषां पक्षा न सन्ति। [4]पुनः कैर्वायुभिरेव। किंतु मूर्तत्वादेते चक्षुरिन्द्रियग्राह्याः। गुणेन तु वायव एवैते। पुनः कैर्मनोभिरेव। किंतु महाप्रमाणैः स्थूलतनुभिः। मनस्त्वेभ्योऽणुप्रमाणत्वेनैव विशिष्यते। पूर्वं पूर्वगुणानामरुच्योत्तरोत्तररूपणम्। ताक्ष्र्याद् वायुः शीघ्रगतिस्ततोऽपि मनः। अश्वादिभ्यस्तु पक्षिराङ्गति शीघ्रत्वे(त्वं) प्रसिद्ध एव। राज्ञां पुरुषार्थत्रयसिद्धिर्दिग्विजयेन, स च प्राधान्येन वाजिभिरेव भवतीति तद्वैशिष्ट्य--सम्पत्प्रतिपादनं झटिति [5]भैमीनिकटागमनकारणसूचने च तस्याश्वहृदयविद्येति ॥३७॥

सङ्ग्रामभूमीषु भवत्यरीणामस्रैर्नदीमातृकता गतासु।

तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ॥३८॥

---

1. B1. यथावस्थित- 2. B2. बध्नौ. 3. B2. निर्जिता. 4. B1, B2. om. पुनः ....एवैते.
5. B1. भैमीविकल्प ?-न.

तस्य बाणास्तेषां धारा अश्रा[1]स्त एव पवनाशना वाताहाराः सर्पास्तेषां सुभिक्षं भवेत् । तच्च तत्रैव यत्र तन्निष्पत्तिः[2] सम्यगित्याह । कैः कृत्वा? असुभिः प्रसिद्धैः प्राणपवनैः । कीदृशैः? राजवुजस्येमे राजवुजीयास्तैरिति नितान्तवैशिष्ट्यमाह । पवनो हि सामान्यस्तत्र इतरप्राणिपवनो विशिष्टो राजप्राणि[3]पवनस्तु नितान्तं विशिष्टतमो, विशिष्टान्न[4]मयत्वात् । तथा च श्रुतिः । "अन्नं वै प्राणाः" इति । किं सर्वत्र भुवि सुभिक्षं भवति । किं कस्मिंश्चिदेव विषय इत्याह । सङ्ग्रामभूमीषु रणक्षोणीष्वेव । तत्र किं कामवर्षिणि कस्मिन्नपि पर्जन्ये वृष्टे सत्येवं भवेदुत कूपतडागाद्युद्धृत--जलसेकसारणीपरिकरादिभिरित्याह । कीदृशीषु? गतासु प्राप्तासु । काम्? नदीमातृ--कताम् । नद्यम्बु[5]सम्पन्नव्रीहिपालितत्वम् । कैः? असैः रुधिरैः । केषाम्? अरीणां शत्रूणाम् । एतेन सम्भूयागतानां राज्ञां विविधेषु सैन्येषु जलरैनिकैर्विनिहतेषु सत्सु तांस्तान् प्रति सम्भूयोत्थितान् स स्वयमेव लघुहस्ततया प्रत्येकं वेध्यीकृत्य पातयतीत्यर्थः । अन्यत्रापि केषाञ्चिद्राजशालिभोजिनां क्वापि सन्नदीमातृकेषु देशेषु निष्पन्न विविधव्रीहौ क्वचिद् विशिष्टग्रामक्षेत्रादिनिष्पन्नराजशालौ सुभिक्षं लक्षणया सुलभराजशालिभोजनत्वं भवतीति । अरयोऽत्र राजवुजादपरे । तेषां च प्राणवायवोऽन्येषां जलसुभटानां[6] या बाणधारास्त एव पवनाश-[71-b]-नास्तेषां बहुभोजनं सम्पद्यन्ते । राजवुजा[7]स्वपि तत्र सत्सु बहुत्वादपरारिरुधिराणामेव नदी--सम्भवकारणत्वं विवक्षितम् । अम्भोधिरिवातिगम्भीरोऽयं श्लोकस्तद् भावार्थ[8]रत्न--ग्रहणाय सूक्ष्ममतिमन्दरमन्थानिकया विबुधानां भाव्यमिति ॥३८॥

---

1. B1. आश्रयः D. अश्राः, कोणाः, कौणेऽसृग्वधाककोश - marginalia.
2. B1, B2. om. तत्. 3. D. -प्राण-, B2. -प्रमाण- 4. B2. -नियमत्वात्.
5. B2. नद्यस्तु. 6. B1. जलवत्- 7. B2. गज- 8. B1, D. भवार्थ-

यशो यद[1]स्याजनि संयुगेषु कण्डूलभावं [2]भजता भुजेन ।
हेतोर्गुणादेव दिगापगालीकूलंकषत्वव्यसनं [3]तदीयम् ॥३९॥

विविधमृधसम्भूतं प्रभूतं यशोऽस्य दिङ्मण्डलीमण्डनमस्तीति भङ्ग्या दर्शयति। रणेषु नलस्य [4]खर्जूरमत्त्वं प्राप्नुवता[5] बाहुदण्डेन यद्यशोऽजनि प्रसूतं जनितं तस्य दिश एवापगा नद्यस्तासामाली श्रेणी इत्यर्थः, तस्याः कूलानि कषति विलिखति यस्तस्य भावस्तत्त्वम्। तदेव व्यसनं [6]दुःशीलता। तद्धेतोः कारणस्य जन्मकर्तुर्गुणादेवेति कण्डू-लस्याङ्गजोऽवश्यं कण्डूलो भवति। कुष्ठिनः पुत्रश्चेत् कुष्ठी न भवति, तदवश्यं तद्गात्रे [7]पञ्चषाद भवन्ति। कारणगुणाः कार्ये सङ्क्रमन्तीति पूर्वं बहुकृत्वो दर्शित-मेव। [8]खनित्रेऽनन्तः। व्यसनं कोपकामजो दोषः ॥३९॥

यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात्।
पारेपरार्धं गणितं यदि स्याद् गणेयनिःशेषगुणोऽपि स स्यात् ॥४०॥

यदि त्रिभुवनं सङ्ख्यानैकनिष्ठं भवेत्, तद्यदि परमपुरुषवद् दीर्घायुर्भवेत्। परार्द्धस्य पारे यदि गणितागम[9]गणनपरिपाटिर्भवेत् तदा तस्य निःशेषा गुणा गण्येरन्निति क्रिया-तिपत्तने सप्तमी।

"एकं दशशतमस्मात् सहस्रमयुतं ततः परं लक्षम्।
नियुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं च ॥१॥
तस्मान्महासरोजं शङ्कुं सरितां पतिस्ततस्त्वन्त्यम्।
तस्मात् परार्धमाहुर्यथोत्तरं दशगुणं [10]तज्ज्ञाः ॥२॥

कारणमालैवालङ्कारोऽत्र परिणमति ॥४०॥

---

1. B2. दय-, 2. B2. वजता. 3. B2. तदीर्यम्. 4. B1, B2, खर्जूमत्वं. 5. B2. -वती.
6. B2, 8. दु-. 7. पञ्चषाद ? 8. B2. -रत्ने. 9. B2, 8. -गण-. 10. B2, 8. तज्ञाः

अवारितद्वारतया तिरश्चामन्तःपुरे तस्य निविश्य राज्ञः।
गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ॥७१॥

भङ्ग्यन्तरेण प्रतिलोभयति। वयं नलस्यावरोधे चिरमवस्थाय मनोहरेषु गमनेषु यद् गुणकृतमाधिक्यं शातोदरीर्नारीः प्रधानकर्मतापन्नास्तद् गौणं कर्मतापन्नं शिक्षयामः। कथा तत्र बहुकालं स्थित्वेत्याह। तिरश्चामवारितद्वारतयेति। तिर्यञ्चो हि पशुजातीया विशिष्टज्ञानशून्यत्वात् सर्वत्र प्रवेशं लभन्ते। परमाणुमध्या लक्षणया कृशोदर्यः। तत्र-त्याश्च ताः स्वतः एव हंसगतयः। यस्य तु विशेषस्याभावस्तं वयमध्यापयाम[1] इति नलान्तःपुरे नितान्तरूपशालिविविधबालिकेतरोपवर्णनम् ॥७१॥

पीयूषधारानघराभिरन्तस्तासां रसो-[७२.अ]-दन्वति मज्जयामः[2]।
रम्भादिसौभाग्यरहः[3]कथाभिः काव्येन काव्यं सृजताहताभिः ॥७२॥

किं तासां तनूदरीणामन्तश्चित्तं रसोदन्वति रागसमुद्रे बोलयामः[4]। काभिः कृत्वा? रम्भातिलोत्तमोर्वशीप्रभृतिनाकनारीणां सौभाग्यप्रधाना या रहःकथास्ताभिः। यया यया ताः स्वसुभगवशीकृतैः प्रेमामृत[5]पात्रभूतैः सुभगैः समं कामागमोपदेशपुरःसरं रमन्ते तद्रूपै-राख्यानकैः। कीदृशैः? काव्येन शुक्रेण काव्यं शृङ्गाररसप्रधानं प्रबन्धविशेषं सृजता निर्मिमाणेनाहताभिर्यत्नादुपात्ताभिः। कीदृशीभिश्च? पीयूषस्य धारा वेणयः सूक्ष्मा सराः प्रवाहास्ताभ्योऽनर्धरा अहीनास्ताभिस्तत्समाभिरित्यर्थः। यत्र तासामनुराग-तद्वृत्तत्वलक्षणा या रहःकथाः। रसश्चेक्षुदण्डादिजो[6] द्रवद्रव्यविशेषस्तस्योदन्वान् युक्त एव ॥७२॥

काभिर्न तत्राभिनवस्मराज्ञाविश्वासनिक्षेपवणिक्क्रियेऽहम्।
जिह्रेति यन्नो[7] बहुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ॥७३॥

---

1. Br. -थामास- 2. Br. लङ्घयाम; 3. Br. -रथ- 4. बोलयामः ? 5. Br. प्रेम्णा- 6. Br. रसाश्च- 7. Br. यन्नो.

तन्नान्तःपुरे अभिनवा या स्मराज्ञा, मन्मथादेशः, सैव विश्वासस्थापनीयो विक्षेपः[1]। स्थापनिका तस्य वणिक् वाणिजकः काभिर्वधूभिर्नाहं क्रियेय। अपि तु तत्रत्याः सर्वा अपि निजरहस्यं मन्मथविकृतिकृतं मह्यं निवेदयन्तीत्यर्थः। नन्वेवमाचरन्त्यस्ताः त्रपन्तेऽपि नेत्याह। यत् कारणात् तिर्यक् बहुभ्योऽपि न लज्जते, तेन कारणेन तिरश्चः सकाशात् कश्चिन्न त्रपते। तिर्यञ्चो हि बहुषु मनुष्येषु पश्यत्स्वपि मिथुनीभवन्ति। तथा च तेषु पश्यत्सु मनुष्या इति। स्मराज्ञा च तासां नलविषयैव केवलं परस्परानवबोधात् रहस्यत्वम्। तिर्यगिति सामान्येन नपुंसकत्वम् ॥४३॥

वार्ता च साऽसत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे।
विरिञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥४४॥

सा च वार्ता खल्वसत्यप्यसदृश्यपि नापरं प्राणिनं याति। षट्कर्णा न भवतीत्यर्थः। सा केत्याह। यामहं हृदि निरुन्धे मनस्यवस्थापयामीति शुकसारिकावत् श्रुतानुवादकत्वमात्रमात्मनो निरस्तम्। कीदृशे? अरन्ध्रे निश्छिद्रे। कस्मात्? योगात् ध्यानात्। युक्तितो वा मम हि चित्तमतीव निर्भेधम्। कीदृशोऽहम्? विरिञ्चेर्नानारूपाणि यान्याननानि तेषां वादेन[2] पक्षप्रतिपक्षस्वीकारपूर्वेण वचःप्रपञ्चेन धौतानि निर्मलीकृतानि यानि योगप्रधानानि शास्त्राणि श्रुतयश्च वेदास्तैस्ताभिश्च पूर्णौ कर्णौ यस्येति निजस्य विशिष्टज्ञानसूचनेन रहस्याभेदसूचनम्। अथ वार्थान्तरम्। सा खल्वसत्यपि कुलटापि नान्यं कामुकमेति। यामहं योगादुपायादरन्ध्रे हृदि निरन्तरे वक्षसि निरुन्धे गाढमाश्लिष्य निवेशयामि। [४२-४] अत्र च विरिञ्चिनानेत्यादिना प्राप्तं नीतिज्ञत्वं हेतुः। प्रमाणतर्कसाधनोपालम्भः[3] सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। 'योगः संहननोपायध्यानसङ्गतियुक्तिषु' ॥४४॥

---

1. B1. निक्षेपः. 2. B2. नादेन. 3. B1. प्रमाणं तथा. B2. प्रमाणं तथा तर्कम्.

नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या ।

कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ॥७५॥

अहह भवत्या दुर्लभं स्वर्गशर्म नैषधसंबन्धे । नापरा काचिन्नायिका प्राप्नोतीति काकुगर्भं वचोऽसमञ्जससूचकम् । केव केन कमित्याह । पद्मिन्या दुष्प्रापं चन्द्रिका-महं चन्द्रसंसर्गेण कैरविणीवेति दैवविलसितमेतद्व्यवस्थायोगभोग इति भावः । स च युक्त्या समभ्यूह्यः । परिग्रहो दारा अपि ॥७५॥

तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कुलचारुजन्म ।

रसालवन्या मधुपानुबद्धं सौभाग्यमप्राप्तवसन्तयेव ॥७६॥

तद्धीत्युपसंहारे । अस्मद्विहितप्रियवाक्यसमुद्भूतं सुखं नलापरिणीतत्वाद् भवत्या दुर्लभम् । यदि नलस्त्वां विधिवत् परिणीय मुख्यपट्टराज्ञीपदे निवेशयति, ततो वयमनुक्षणं विचक्षणवच्चाटूनि विरचयन्तो भवतीं परितोषयाम इत्यर्थः । कया कीदृश्या किं यथा दुर्लभमित्याह । सहकारराज्या स्वत्यनासादितचैत्रया भृङ्गसंयोजितं रामणीयकमिवेति ॥७६॥

तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य ।

अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥७७॥

अथवा तस्यैव नलस्य पाणिं किं न प्राप्स्यसि । कान्ता अपि तु प्राय एवं भविष्यति । कथं त्वमेवमवैषीत्याह । धातुश्चित्तं प्रविश्य केन विलोकितमस्तीति लोको-क्तिरियम् । को जानाति यदि च किल भवती नलायैव प्रतिपादयितुं विधिना मनीषिता भविष्यसि । किञ्च सम्भवोऽप्यस्तीति दर्शयति । असि त्वं तावदकृत-विवाहा लावण्यसंस्थानातिरेकाधारश्चासि । द्वयं चैतत् प्रथमं कारणं राज्ञो नृपकुमार्याः पाणिग्रहणे । तावदित्यवधारणे ॥७७॥

निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥४८॥

नलसंबन्धं प्रत्ययस्या उपपत्त्यन्तरमाह। धातुरपि स्वरसप्रवृत्तः श्रमः खल्वन्यो-ऽन्यमुचितसंयोगाय विहितोऽस्ति। प्रायेण विधिरन्योऽन्यं योग्यौ यूनौ योजयतीति सर्वः कोऽपि जानातीत्यर्थः। किं कुर्वन्तः[1]। रात्र्या सह चन्द्रं, गौर्या हरं[2], लक्ष्म्या हरिं योजयतः, सङ्गमयत इति दीपकम्। निशा चन्द्रस्य योजनं वर्तमानमस्तीति शतृङ्[3] भवतु। तदन्यद्वयस्यातीतत्वात्[4] तत्र कथं तदुत्पत्तिरिति चेद् ब्रूमः। धातु-संब-[73-a]-न्धे प्रत्यया भवन्ति। अथवा संयोगस्य वर्तमानत्वाद्भूतावविवक्षैव। स्वरसेन निजरागेण प्रवृत्तः स्वारसिकः। अनन्यप्रयुक्त एवात्र[5] ब्रह्मा श्राम्यती-त्यर्थः। रसो भावना वा ॥४८॥

वेलातिगस्त्रैणगुणाब्धिवेणिर्न योगयोग्यासि नलेतरेण।
संदभ्यते[6] दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ॥४९॥

उद्वेलललनावृन्दसौन्दर्यादिधर्मसिन्धुमध्यधारा त्वं नलादितरेण यूना सह संबन्धार्हा न भवसि। एतदर्थं स्थिरीकरणार्थं वस्त्वन्तरमुपन्यस्यति। विचकिल[7]-कुसुमस्रक्[8] मृदुलतमा नितान्तकरकटेन कुशवटेन सह न गुथ्यते केनापीति शेषः। मल्लीमालाया मृदुत्वे, दर्भगुणस्य कर्कशत्वे च, सुप्रसिद्धत्वेऽपि रूपकथन-द्वारेण तदुपादानमत्रोक्तिप्रत्युक्तिभेदेन विशेषार्थम् ॥४९॥

विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम्।
त्वन्नामवर्णा इव कर्णपीता मयास्य संक्रीडति चक्रिचक्रे ॥५०॥

---

1. B1. कुर्वन्तम्. 2. B1, B2. हरिं, 3. B. शंतृङ्. 4. B1. अन्यत्. 5. B1. एव. 6. B2. संदभ्यते. 7. B2. विध– 8. B2. स्रक्

विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम्।
त्वन्नामवर्णा इव कर्णपीता मयास्य संक्रीडति चक्रिचक्रे ॥५०॥

हे भैमि! नलविलसनार्हां कन्यासर्गं विधिमहं पृच्छन्नेवास्मि। यतोऽहं तद्-
-वाहनवाहनम्। तर्हि किमिति न कथ्यते सेत्याह। मया तदभिधानस्याक्षराणीव
कर्णाभ्यां पीतानि। प्रश्नानन्तरं भैमी भैमीति ध्वनिर्मम कर्णयोः पतित इत्यर्थः।
क्व सति? अस्य विधेश्चक्री रथस्तस्य चक्रे पादावयवविशेषे संक्रीडति कूजति
सतीति सम्यक्श्रवणाभावे हेतुः। अत्र च युग्यशब्देन[1] रथ आकृष्टः, स च चक्रि-
-शब्दवाच्यस्तेनापि चक्रमाकृष्टं, तेनापि च कूजनमिति। केचित् तु चक्रचक्र इति
पाठं कृत्वा चक्राश्चक्राङ्गास्तेषां चक्रं समूहस्तस्मिन्निति व्याचक्षते। तदा संक्रीडतीति
शकटे प्रसिद्धः प्रयोगो वैयर्थ्यमापद्यते। यतः समोकूजने क्रीडने क्रीड आत्मनेपदम्।
संक्रीडन्ते सार्थाः। सम्यक्शब्दं कुर्वन्त इतस्ततो विहरन्तीत्यर्थः। कूजने तु संक्रीडन्ति
शकटानि। अव्यक्तशब्दं कुर्वन्तीत्यर्थः। कर्णपीता इति समासः, सापेक्ष इव न
तथा चमत्कुरुते। अथवा क्वापि सापेक्षेऽपि कृत्तद्धितसमासा भवन्ति नो वा।
कर्णपीताः। कृता इत्यर्थश्चाश्चर्यम्। अन्यत् तु सहृदयैर्विमृश्यम्। तद्यानानि हंसा-
-स्तेषां युग्यो[2] वाहनमिति पुंस्त्वं चिन्त्यम्। युग्यशब्दस्य नपुंसक आम्नातत्वात्।
अथवा युगं वहतीति[3] युग्यस्तद्यानस्य तद् युग्यस्य युग्यायुग्यवाहनार्ह इति। अयमेव
च पक्षः श्रेयान्। एवं सति हि चक्रिचक्र इति मुख्यवृत्त्यैव सुघटं स्यात् ॥५०॥

अन्येन पत्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा।
जनापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरिः स्यात् ॥५१॥

---

1. B2. वधः. 2. B1, युग्यं. B2. युग्यो. 3. B2. अर्हतीति. 4. सर्हतीति.

अथवा लोकनिन्दाब्धेः पारं गन्तुं सुष्ठुस्तु कः प्रकारो भवेत्। कस्यां सत्याम्? भवत्यां नलादपरेण धवेन सङ्गमितायां सत्याम्। कीदृशस्य? चातुर्य--प्रसिद्ध्या वृद्धीभूतस्य। 'ब्रह्मा विधि' इति प्रसिद्ध्या विशिष्ट एवं स स्थविरीभूतः। इदानीं भवतीं कन्यारत्नं नलं युवरत्नं विहाय यदि युवान्तरेण योजयेद् विधिस्तदा जायं किमपि जानातीति। जनस्तमपवादजलधौ निमज्जयेत्तराम्। सामान्यार्णवोत्तरणाय पोताधारोहणं प्रकारोऽस्ति। अत्र तु नास्त्येवेत्यर्थः। 'कतमा तरीः स्यात्' इति त्वर्वाचीन एव पाठो लक्ष्यते, विचारासहत्वात्। न हि सामान्यार्णवोत्तरेण कतमेति प्रकर्षो निर्धार्यते। 'विधा विधौ प्रकारे च' ॥५१॥

आस्तां तदप्रस्तुतचिन्तयालं मयासि तन्वि श्रमितातिवेलम्।
सोऽहं तदागः परिमार्ष्टुकामः किमीप्सितं ते विदधेऽभिधेहि ॥५२॥

आस्तां तिष्ठतु। भाषितेन पूर्णमित्यर्थः। हे तन्वि कृशाङ्गि! मया त्वमतिवेलं भृशं श्रमितासि खेदिता वर्तसे। कया? अलमत्यर्थं तस्य नलस्याप्रस्तुताऽप्राकरणिकी चिन्ता विचारस्तया। अभिधेहि कथय। सोऽयमीदृशस्तव सुकुमारतरतनोः श्रम दुःखदः। किं रुचितं सम्पादयामि। अभिधेहीति सामान्योपक्रमे वाक्यार्थस्यैव कर्मता। कीदृशोऽ--हम्? तस्य श्रमोत्पादनस्यागोऽपराधस्तत्परिमार्ष्टुकामोऽपनिनीषुः ॥५२॥

इतीरयित्वा विरराम पत्री स राजपुत्रीहृदयं बुभुत्सुः।
ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ॥५३॥

स हंस एवमभिधाय तूष्णीं बभूव। किं कर्तुमिच्छुः। नृपकुमारीमनो बोद्धुकामः। अस्या मनसि कोऽर्थोऽस्तीति जिज्ञासुः। युक्तं चैतत्। जलाशये अतलस्पर्शे यष्ट्या--दिना जानुदघ्नप्रवेशेन वा अवगाढे विलोडिते हृदि च गभीरे दुर्बोधेऽवगाढे अनु--भावेङ्गितादिना परिच्छिन्ने निश्चिते कार्यार्थमवतरं प्रवेशम्। कार्यस्य

कर्तव्यस्य वा अवसरमवसरं निवेदनं नीतिविदः श्लाघ्यं तेन तु राभसिकतया ॥५३॥

किञ्चित्तिरश्चीनविलोलमौलिर्विचिन्त्य वाच्यं मनसा मुहूर्तम् ।
पतत्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ॥५४॥

सा राजपुत्री मनाक् तिर्यक् विधूतमूर्द्धा सती क्षणं वक्तव्यं चित्तेन विमृश्य इदमूचे । कीदृशी? मुखेन विनिर्जितचन्द्रेति । तद्गुणवर्णनश्रवणेन मुखस्य प्रासादातिशयः सूचितः ॥५४॥

धिक् चापले! वत्सिमवत्सलत्वं यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्ग्या मया तटस्थस्त्वमुपद्रुतोऽसि ॥५५॥

हे सौम्य चापले! चपलभावे! वत्सिमवत्सलत्वं धिक् । वत्सस्य तर्ण-[74.a]-कस्य भावो वत्सिमा तर्णकत्वं, तेन वत्सलत्वमतिरुचिमत्त्वम् । तर्णकस्य चापलमतिरुचितं भवति । मयि च बालत्वात् तर्णकत्वं प्रवर्तते । ततश्च मह्यं चापलं वत्सलमतीव रुचितं, तच्च निन्द्यमित्यर्थः । यस्य चापलस्य प्रेरणादुत्तरलीभवन्त्या उत्प्लवमानया मया त्वं तटस्थो निकटवर्ती सन्नप्युपद्रुत[1] उद्वासितः सुखोपविष्टश्चर[2]न्त्या समुत्रास्य दूरं गमित इत्यर्थः । कयेव? समीरसङ्गाच्चण्डमरुत्संयोगादुत्तरलीभवन्त्या प्रचलन्त्या नीरभङ्ग्या जलरचनया लहर्या[3] तटस्थः प्रतीरवर्ती सन् यथा त्वमुपद्रूयसे । वत्सस्य भावो वत्सिमेति वत्सशब्दः पृथ्वादिगणे पठ्यते । अनुत्तरला उत्तरला भवन्त्युत्तरलीभवन्ती, तया । वत्सं लातीति वत्सला । धेनुस्तत्सादृश्यादपरोऽपि वत्सल उच्यते । प्रेमातिशयसमायातोपचारवृत्तेः ॥५५॥

आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः ।
आगः पुरःकुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥५६॥

---

1. B2. उपप्लुत. 2. B. चरन्ता. B2. चरन्त्या. 3. B2. हुलयति.

खलु नूनं स त्वं तावदादर्शतां अयासि दर्पणीभवसि । केषाम्? सतां महात्मनाम् । कथा? स्वच्छतया नैर्मल्येन विशुद्धचित्ततया । कीदृशस्त्वम्? दर्शनीयो दर्शनार्होऽर्थात् सतामेव । आदर्शो हि स्वच्छो भवति । सतां मूर्तिमत्तां दर्शन-योग्यश्च । हंसस्तु सौवर्णत्वात् दृश्यो विद्यत एव । तच्च द्वयं त्वयि वर्तते । तस्माद् भवान् सतां मुकुर एवेति प्रशंसा । यथा कस्यापि कुलदीपतया योजितस्य प्रशंसा गम्यते । आदर्शत्वे हि धर्मान्तरमप्याह । स क इत्याह । यस्य ते भवत आत्मन्यन्तःकरणे इदमेतदागः प्रतिबिम्बितमपराधः प्रतिफलितः । किं कुर्वत्यात्मनि? मां सागसं पुरस्कुर्वत्यग्रे विदधति । अपराधो हि तात्विको[1] मयि, त्वयि तु प्रतिबिम्बरूपतया मिथ्यैव । आदर्शस्यात्मनि तलभागमध्ये काञ्चिन्नृपकुमारिकां सालङ्कारामन्यं वा कञ्चनाग्रे कुर्वति सति, खलु तदलङ्काराः प्रतिबिम्बन्ते । सतां महात्मनां सद्रूपाणां मूर्तिमतां च । पुरस्कारः प्रोत्साहनं सत्करणमग्रे स्थापनं च । स्वच्छोऽकलुषो द्वेषादि[2]प्रकाशकविमलाशयश्च ॥५६॥

अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य! तावत्[3] ।
हंसोऽपि देवांशतयासि वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ॥५७॥

हे सौम्य! मधुरमूर्ते! मम कुमार्या अतिमुग्धया अनार्यमनुचितमप्याचरितमनु-ष्ठितं भवान् क्षाम्यतु । साधवो हि प्रकृत्या मधुराः, सर्वेषामनुचितमाचरितं तितिक्षन्ति । बालानां तु विशेषतः । कुमार्यास्तु पूज्यतमत्वात् तत्रापि विशेषो, यथा गोब्राह्मणादीनाम् । त्वं च हंसोऽपि तिर्यग्जातीयोऽपि वन्द्यो नमस्करणीयोऽसि । यतोऽतस्त्वयि विनय एव यु-[74.b]-ज्यते, न त्वविनयः । कथा वन्द्य इत्याह । देवांशतया देवकलामयत्वेन । क इव? श्रीवत्सलक्ष्मेव भगवान् विष्णुर्यथा वन्द्यः । कीदृशः?

1. B. तात्त्विको. Br. नात्त्विको. 2. Br. रागद्वेषादि. 3. Br. भावान्.

मत्स्यरूपः। सोऽपि कथा इ देर्व्यांशतया। पुराणपुरुषकला संबन्धेन। पुराणपुरुषः किल्लां-
-शत्वेन नानामूर्तिसमाश्रयणपुरःसरमवतीर्य वीर्यवत्तया तत्कार्यं कुरुते ॥५७॥

मत्प्रीतिमाधित्ससि कां त्वयीशामुदं मदृक्षणोरपि यातिशेताम्।
निजामृतैर्लोचनसेचनाद्वा पृथक्किमिन्दुः सृजति प्रजानाम् ॥५८॥

त्वं पुनस्तां मम मुदं कामाधातुमिच्छसि बलात् न्यसितुमभिलषसि। या मत्प्रीति-
-मदृक्षणोरपि भवदवलोकनमुदमतिशेतामधःकरोतु। ननु मम दर्शनमात्रादेव भवत्याः
कथमीदृशी निर्भरा संपूर्णा प्रीतिर्यत्र प्रीत्यन्तरस्य विशेषवतोऽप्यवकाशो नास्ती-
-त्याशङ्क्य प्रकृतार्थसाधकं वस्त्वन्तरमुपन्यस्यति। वा अथवा स्वसुधाभिः कृत्वा
यन्नयनयोरभिवर्षणं तस्मादन्यच्चन्द्रः प्रजानां किमाचरति। अपि तु दर्शनमात्रेणैव
सुधाकरस्य खलु जना नितान्तमाप्याय्यन्त इति काकुप्रयोगाद् विवक्षितोऽर्थः ॥५८॥

मनस्तु यन्नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः।
का नाम बाला द्विजराजपाणिग्रहाभिलाषं कथयेदलज्जा ॥५९॥
(भिज्ञा)

तु पुनः स मनोरथः कामः कण्ठपथं गलमार्गं कथं यातु। स क इत्याह।
यं मनोरथं जातु कदाचिदपि मनः कर्तृ न मुञ्चति। यो वाञ्छितोऽर्थो भवत्या
मनसि स्थिरतरीभूय तिष्ठति स किमिति न निष्कास्य प्रकाश्यत इत्याह। नाम
भो का बाला स्वजनभिज्ञा निस्त्रपा सती द्विजराजस्य चन्द्रस्य पाणिजो यो ग्रह
आनन्दः तस्याभिलाषमिच्छां कथयेत्। काक्वा निषेध एवार्थस्यास्य प्रतीयते।
अनेनाभिलाषपूरणस्य दूरमसम्भवो दर्शितः। अथ चार्थान्तरम् — हे द्विज! हंस! नाम
प्रकटमेव का बाला शैशवयौवनमध्यवयस्का कुमारी निर्ह्रीका सती राज्ञो नृपस्य
यः पाणिग्रहो विवाहस्तदिच्छां कथयेत्। अपि तु, न कापीति व्याख्यानद्वयपक्षेऽपि
काक्वा निषेधः। राज्ञा सह योऽसौ पाणिग्रहः स राज्ञ एवेति संबन्धो न विहन्यते ॥५९॥

वाचं तदीयां [1]परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः।

तत्याज तोषं परपुष्टघुष्टे घृणां च वीणाक्वणिते वितेने ॥६०॥

मनीषितार्थसमाश्रितवचनश्रवणेन कृतार्थमिवात्मानं [2]मन्यमानः स मानसौका भृशं जहर्षेति भङ्ग्यन्तरेणाह। स मानसौका भैम्याः कोमलां गि-[75-a]-रं समाकर्ण्य कोकिलस्य पुनरुक्ते कूजिते तुष्टिमत्यजत्। विपञ्चीनादप्रपञ्चे च महतीं घृणां दधे। यतः कीदृशीं वाचम्? मृद्वीकया तुल्यरसां समानस्वादाम्। रसः [3]आवो वा। द्राक्षारसः खल्वम्लमधुरस्तद्द्वयं तु मधुरमेव। वाचि तु [4]रसनाग्राह्यद्राक्षारस-साम्यनिवेश उपचारात् ॥६०॥

मन्दाक्ष मन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः।

तच्छंसिते किञ्चन संशयालुर्गिरा मुखाम्भोजमयं युयोज ॥६१॥

अयं हंसो वाचा सह वदनकमलममेलयत्। कीदृशः? भैमीभणितं[5] मनाक् सन्दिहानः। कस्यां सत्याम्। तस्यां संवृतगिरि। किं कृत्वा एवंरूपायामित्याह। मन्दाक्षेण लज्जया मन्दा अप्रगल्भा किञ्चिल्लक्ष्या अक्षराणी मुद्रा [6]चिह्नं सङ्केतो यत्र एवमुक्त्वा। अत्र च हंसमुखस्याम्भोजत्वरूपणं गन्धमात्रात् श्रीसद्-भावाद् वा तत्र संस्थानलेशस्याप्यभावात् प्रशंसामात्रं वा ॥६१॥

करेण वाञ्छेव विधुं विधर्तुं यमित्थमात्थ त्वमहो तमर्थम्।

पातुं श्रुतिभ्यामपि नाधिकुर्वे वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ॥६२॥

तदेव तद्वचस्तथ्यमाह। हे बाले! तमर्थमहं किं श्रोतुमपि नाधिकारी? तं कमित्याह। यं त्वं यत्नवती सतीत्थं ब्रूषे। इत्थं कथमित्याह। हे हंस! मम करेण

---

1. D, B2, B1. प्रतिपद्य. B1. परिपीय - interlinear. 2. B1. om. मन्यमानः
3. B2. आवी. 4. B1, B2, D. रसन - 5. B2, D. - भणिते. 6. B1, B2, D. चिह्नजं.

विधुं विधातुं वाञ्छेव वर्तत इति। क इव कमित्याह। अन्तिमो वर्णः शूद्रजातिर्वेदा-
-क्षरस्य श्रवणेऽपि यथा नार्हः। पाठविचारादि दूरे तिष्ठतु। शूद्रस्य वेदाक्षर-
-स्यैकस्यापि श्रवणेऽपि न विनियोगः क्वापि पुराणादौ दृष्टोऽस्ति। प्रकृति-
-वदनुकरणं भवतीति यथा प्रथमान्तं[1] दमयन्तीवाक्यं तथैवानुकृत्येत्थमि-
-त्थनेनोक्तम् ॥६२॥

अर्थाप्यते वा किमियद् भवत्या चिन्तैकपद्यामपि विद्यते यः।

यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥६३॥

अथवा त्वया आप्यते लभ्यते। किमेतदस्ति। काक्वा स्तोकमेवैतदित्यर्थः। 'आप्यते'
इति सामान्येन वचनम्। किमेतदिति च द्वितीयं स्वप्रधानमेव। इयदित्यनेन
यत्परिच्छेदो विवक्षितस्तमाह[2]। योऽर्थश्चिन्तैकपद्यामपि मनोमार्गेऽपि प्रवर्तते। योऽर्थो
मनोगोचर स कियान्। काक्वा, अपि तु, स्तोक एवातो भवत्या लभ्यतेऽपि। यतः
यत्र ब्रह्मणि, परे तत्त्वे, चेतसोऽप्यन्धकारो यच्चिन्तमपि न गृह्णाति, जिह्मेतरैर-
-कुटिलमतिभिः प्राज्ञैस्तदपि ब्रह्म सुलभमित्यागमः। यदि तव मनसि कौटिल्यं
न भवति, तदवश्यं स्वमिमं मनोरथं पूर्णं विन्दसीति भावः। 'अथ(वा)प्यते'
इति पाठान्तरम्। यथैव लोकोक्तौ खण्डं खण्डं काकुगर्भं वाक्यं व्यवहरन्ति,
तथैव कविरयं प्रायोऽनुकरोति तद् भणितिभङ्गिरुल्लेख्या ॥६३॥

[75·b]
ईशाणिमैश्वर्यविवर्तमध्ये लोकेशलोकेशयलोकमध्ये।

तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ॥६४॥

हे ईशाणिमैश्वर्यविवर्तमध्ये! स्वलितनूदरि लोकेशलोकेशयलोकमध्ये! मां तिर्यञ्चं
विशिष्टज्ञानबहिर्भूतं पशुजातीयमप्येवंभूतं अञ्च जानीहि। कीदृशमित्याह। मृषा वितथं

---

1. B2. मध्यमान्तं. 2. B2. विक्षित -

तत्रानभिज्ञा अप्रवीणा रसज्ञा जिह्वा येषां, तेषां भावस्तत्ता, तया या अपज्ञा आद्यं ज्ञानं, तया कृत्वा समज्ञा कीर्तिर्यस्येति निजप्रतिज्ञाव्यभिचारसूचनम्। ब्रह्मलोकनिवासिषु[1] सत्ययादिषु मध्येऽतिसत्यतया मम महीयसी कीर्तिरिति तात्पर्यार्थः। लोकेशो ब्रह्मा, तस्य लोके भुवने शेरते वसन्ति ये लोका जनास्तेषां मध्ये। ईशस्य भगवतः शम्भोर्यदणिमरूपमैश्वर्यं[2] विभूतिस्तस्य विवर्तः परिणामो मध्यो यस्या-स्तस्याः सम्बोधनम्। विवर्तः परिणामस्तद्रूपतापत्तिरिति यावत्। अञ्चेति सर्वे गत्यर्था ज्ञानार्थाः। अत्रासम्मितत्वं न दोषः, कौतुकमात्रदर्शनात्। अनुप्रासश्चायमुल्ब-णोऽप्यवाचकपदनिबद्धोऽपि क्वापि विचित्रतया गुण एव। किञ्चात्र वस्तुस्तिर्य-[3]वत्त्वादनुनासिकान्तपदप्रायं वचनं तिर्यञ्चमञ्चेत्यादि च चकारान्तमुचितमेव। पक्षि-शब्दो प्रायस्तथा दर्शनात् ॥६४॥

मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः।
ह्रियैव ताभ्यश्चलतीयमद्धा यथा न सत्सङ्गगुणेन बद्धा ॥६५॥

नोऽस्माकं मुखे वर्तमाना सरस्वती भारती प्रतिवेशिनीनामनन्तरवर्तिस्थाननिवासि-नीनां श्रुतीनां वेदापरनाम्नीनां मध्ये वासवती सर्वकालनिवासिनी। अत एवाति-निकटत्वात् ताभ्यः सकाशादियं ह्रियैव चलति। कावद्या अपि तु तासां लज्जयैव न व्यभिचरतीत्यर्थः। श्रुतयो ह्यव्यभिचारिण्यस्तत्संसर्गादवश्यं मद्गिरापि बलादेव [4]तादृश्या भवितव्यम्। अद्धा सत्यार्थे श्लोकार्थे वा। नैव चलति श्लोकमपि, न चलतीति वा। कथं यथा, का न चलतीत्याह। यथा सत्सङ्गगुणेन बद्धा काचिन्नारी न व्यभिचरति। संश्चासौ सङ्गश्च सत्सङ्गः। स एव गुणस्तस्य वा। गुणो धर्मस्तेन बद्धा संयता स्थिरीकृता। नारीणां च श्रेष्ठः सङ्गः सतीभिः सह यो वासः स एव।

---

1. B2. -निवासिषु. 2. B2 यदणिम- 3. B1. तिर्यक्त्वाद- 4. B2. तादृशी.

न तु सतीनां सङ्गः सत्सङ्ग इति समासः। पुंवद्भावस्य दुर्घटत्वात्। स्वजात्यपेक्षया सत्त्वमसत्त्वं च सङ्गस्य। ब्राह्मणानां ब्राह्मणविषयमेव शोभनत्वमशोभनत्वं च सङ्गस्य। गवां गोविषयमेव। स्त्रीणां स्त्रीविषयमेवेत्यादि। पक्षे गुणः सूत्र शणादि-मयो वरविशेषः। एतेन निजस्य वेदचतुष्टयकथनेन निजवाचश्च त-[१८०a]-न्त साम्येन सर्वथैवाव्यभिचारित्वमुक्तम् ॥६५॥

पर्यङ्कतापन्नसरस्वदङ्कां लङ्कापुरीमप्यभिलाषि चित्तम्।
कुत्रापि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशये शयालु ॥६६॥

हे भैमि! चेद् यदि क्वापि वस्तुनि अभिलाषि साभिलाषं सत्, ते चित्तं पर्यङ्कतापन्नसरस्वदङ्कां लङ्कापुरीमपि प्रयाति तदपि वस्तु स्वशये शयालु अवेहि। कमपि दुष्प्रापमर्थं समुद्रान्तस्थितायां लङ्कायामपि वर्तमानं यदि भवन्-मनो वाञ्छति, तमप्यहमानीय तव हस्ते समर्पयामीत्यर्थः। अयं श्लोकस्तथा व्याख्येयो, यथा वाक्य सङ्गतिर्न विघटते। तथा चोत्तरश्लोकेन सह संबन्धो न [1]हीयते। अभिलाषोऽस्यास्तीत्यभिलाषि। पर्यङ्कतामापन्नः प्राप्तः सरस्वतः समुद्रस्याङ्को मध्यं यस्यास्ताम्। लङ्कां पुरीमपीत्यसमासेऽपि शब्दार्थस्तथा न सङ्गच्छते, विशेषणविशेष्यभावसमुच्चयस्य वैसंस्थुल्यात्। तस्माद् यथा समुच्चयार्थो न विरुध्यते तथा विचिन्तनीय[2]मिति ॥६६॥

इत्येवमुक्ता पतगेन तेन ह्रीणा च तुष्टा च बभाण भैमी।
चेतो न लङ्कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम् ॥६७॥

तेन हंसेनैवमुक्ता सती भैमी लज्जिता च [3]तुष्टा च सती बभाषे। किमब्र-वीदित्याह। न मे चेतो मनो लङ्कां रावणपुरीमयते गच्छति। अन्यत्रापि चान्यस्मिन्नपि

1. B2. हीयते. 2. B1. -मपि. 3. B2. तुष्टावसाना-

च वस्तुनि कुत्रापि साभिलाषमभिलषितं नास्ति । मम सर्वं वस्तु खल्विहैव मम पितृगेहे वर्तते । अतोऽन्यत् किमपि वस्तु स्थानान्तरवर्तमानं मम मनो नाभिलषति, न च लङ्कां याति । लङ्कां तदा याति यदि तत्स्थं किमपि विशिष्टं वस्तु काम्यते । तच्च नास्त्येव । अथ चान्योऽर्थो यथा – मामकं मनो नलं वैरसेनिं कामयते वरिष्ठतराम् । अन्यत्र कुत्रापि च चिन्तामणावपि लोलुपं न वर्तते इत्यर्थः । उचितरुचितपतिपाणिग्रहणनिदान[1]सुकथारसनिपातात् ह्रीहर्षसङ्करोऽयं न खलु युक्तः कुमारीणाम् ॥६७॥

विचिन्त्य बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागम् ।
आचष्ट विस्पष्टमभाषमाणामेतां स चक्राङ्गपतङ्गशक्रः[2] ॥६८॥

चक्राङ्गा हंसाः । अत्र तु चक्राङ्गा ये पतत्रिणस्तेषां शक्रो युक्त्या हंसराट् । एतां भैमीं विस्पष्टं यथा स्यादेवमभाषमाणा[3]मचेष्ट । संदिग्धवचःश्रवणसमनन्तरं [4]यत्प्रतिवक्तुं युक्तं तदब्रवीदित्यर्थः । किं कृत्वा आचष्टेत्याह । बालाजनशीलशैलं लज्जानदीमज्जदनङ्गनागं विचिन्त्य । अत्र च तर्के विस्पष्टमभाषणमेव हेतुः । प्रथमः बालाजनस्य कुमारीलोकस्य शीलं स्वभाव एव दुर्गमत्वाच्छैलो गिरिस्तम् । लज्जैव[5] नदी, तत्र मज्जन् प्रकटीभूय क्रीडन्ननङ्ग एव नागो गजो यत्रेति । [76-b] बालानां शीलगिरौ हि लज्जासरित् तत्र गूढं क्रीडन् कामकरीति सर्वथा दुःसञ्चरत्वात् तदधिगमा[6]त्यन्ताभावः सूचितः । यथा क्वापि गिरौ मध्यवर्तिन्यां सरिति प्रकटेतरं तरन्नुच्चितैर्लिङ्गैर्गज उल्लिङ्ग्यते । न[7] तु ग्रहीतुं शक्यते । तथा प्रकृतो मनोभूरित्यर्थः । छेकानुप्रासोऽयम् ॥६८॥

1. D. उपानात - B2. उपानान - 2. D. वक्त्रा - 3. B2. माभाष्ट. 4. B1. यदिति-
5. D. लज्जयैव. 6. B1. -त्यन्ताव भावः 7. B1. ननु.

नृपस्य पाणिग्रहणे स्पृहेति नलं मनः कामयते ममेति ।
[1]आश्लेषि [2]न श्लेषकवेर्भवत्याः श्लोकद्वयार्थः सुधिया मया किम् ॥६९॥

त्वच्चेतसः स्थैर्यविपर्ययं तु सम्भाव्य भाव्यस्मि तदज्ञ एव ।
[3]लक्ष्ये हि बालाहृदि लोलशीले[4] दरापराद्धे[5]षुरपि स्मरः स्यात् ॥७०॥

हे भैमि ! मया सुधिया विबुधेन भवत्यास्तव श्लेषकवेः श्लोकयोर्द्वयस्य पूर्वोक्तस्यार्थोऽभिधेयः किं नाश्लेषि ? कावपि न व्याश्लिष्टौ, बुद्धा इदमव--गूढः, सम्यक् ज्ञात एवेत्यर्थः। कथमाश्लेषीत्याह। एकस्य श्लोकस्य तावदिति। [6]अथ कथमित्याह। मम नृपस्य पाणिग्रहणे स्पृहेति। 'का नाम बाला' (नै. ३.५९) इत्यादि--श्लोकस्य विवक्षितोऽर्थो मयैवमवगत एवेत्यर्थः। द्वितीयस्य त्वित्याश्लेषि। इति कथमित्याह। मम मनो नलं नैषधं कामयत इति। 'चेतो न लङ्कामयते' (नै. ३.६७) इत्यादि-श्लोकस्यार्थस्त्वेवं मयाऽवबुद्ध इत्यर्थः। श्लेषः शब्दार्थभेदेन द्विविधस्तस्य कविः [7]कवयित्री। एवं चेत् किमिति न यथोचितं प्रकृतमनुष्ठीयत इत्याह। भवन्मनसः पुनरस्थिरत्वमभ्यूह्य तस्यार्थस्य तस्मिन् वाऽर्थे ज्ञानरहित एव भावी भविता वर्ते। किमिति ? जानन्नप्यज्ञो भवति भवानित्याह। हि यस्मात् चलाचलप्रकृतौ कुमारीमनसि [8]लक्ष्ये कामो मनाक् च्युतसायकोऽपि भवेत् इति सम्भावयामीत्यर्थः। बाला ह्यप्रगल्भमन्मथत्वात् कदाचित् प्रतिश्रुत--मप्रतिश्रुतमपि करोतीति भावः। संदानितकाभा सोऽयम् ॥६९॥७०॥

महीमहेन्द्रः खलु नैषधेन्दुस्तद्बोधनीयः कथमित्थमेव ।
प्रयोजनं सांशयिकमुमीदृक् पृथग्जनेनेव स मद्विधेन ॥७१॥

---

1. B, B2. अश्लेषि. 2. B. B2. ना. 3. B, B2. लक्षे. 4. B2. -शीलो. 5. B2. -धेषु-. 6. B2. इति. 7. B2. कवयित्वा. 8. B. शरव्ये, B2. सरव्ये.

खलु यस्मान्नलचन्द्रः क्षितिशक्रः यः कोऽपि सामान्यो न भवति। तत्कारणात् मद्विधेन विशेन मूर्खेणैवेदृशं सन्देशस्थिरं कार्यमनेनैव प्रकारेण कथमिव ज्ञापयितुं युज्यते। अपि त्वेवं संदिग्धं कार्यं मूर्ख इव विशोऽयहं कथमिव तस्मै निवेदयामीत्यर्थः। महीमहेन्द्र इत्यनेन तेजो, निषधेन्दुरित्यनेन च सौम्यत्वं मुख्यौ राजगुणौ सूचितौ ॥७१॥

पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे।

त्वदर्थमर्थित्वकृति-[77·a]-प्रतीतिः कीदृग्मयि स्यान्निषधेश्वरस्य ॥७२॥

यदि वा त्वं जनकस्यादेशेन स्वरुच्या वा नलादपरं विशिष्टमविशिष्टं वा तरुणं भजसि, तदा नैषधस्य मयि विषये कीदृशः प्रत्ययो भवेत्। काक्वा तदा सर्वत्र सर्वकालमविश्वास एव मयि तस्य स्यात्। कीदृशे मयि? भवन्निमित्तं यत्नवति। अर्थोऽस्यास्तीत्यर्थी, तस्य भावोऽर्थित्वं याचकत्वं विधायकत्वं तस्य कृत्, तस्मिन् ॥७२॥

त्वयापि किं शङ्कितविक्रियेऽस्मिन्नधिक्रिये[1] वा विषये निधातुम्।

इतः पृथक् प्रार्थयसे नु यद्यत्[2] कुर्वे तदुर्वीपतिपुत्रि सर्वम् ॥७३॥

त्वयापि सम्भावितकुत्से एतस्मिन्नियोगस्थाने अहं निधातुं न्यसितुं किंवा अथवाधिकारीकर्तुं युज्ये। अपि त्वत्र संदिग्धे कार्ये मम नियोगं मा दा इत्यर्थः। हे राजपुत्रि! एतस्मादन्यद्यद्याचसे[3], तदशेषं विदधे ॥७३॥

नयःप्रविष्टा इव तद्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना।

ऊचे द्वियोऽपि श्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री ॥७४॥

---

1. B. -धिक्रिये, 2. B1, B2, B. यत्त्वं. 3. B. एतस्मादन्यदन्यद्यत् यद्याचते.

भूमीन्द्रतनया भूय उवाच । कीदृशी? अगाढीकृतत्रपानुवर्तना । कुलबालानां हि लज्जया महाननुरोधः, सर्वकालं ता[1] हि तामनुवर्तन्ते । तदा तु कार्यवत्तया तदपि मुक्तीकृतमित्यर्थः । किं कृत्वोचे तदाह । ताः पूर्वोक्तास्तस्य हंसस्य गिरो वचन-रचना अवधूयावच्छोद्य क्षिप्त्वेत्यर्थः । केन? मूर्ध्ना । कीदृशेन? वैमत्यं विप्रतिपत्तिररुचिस्तेन धुतेन कम्पितेन । विरुद्धा मतिर्विमतिस्तथा स्वल्पारोचकता[2] गम्यते ॥७४॥

मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषा ।
निशोऽपि सोमेतरकान्तशङ्कामोङ्कारमग्रेसरमस्य कुर्याः ॥७५॥

किमूचे तदाह । हे सौम्य! एषा कल्पना रचनाकवित्वपद्धतिस्त्वदीये [3]मनसि हृदि भावत्के मनसि तावद् वेदः लक्षणया सत्या । अथ च वेदश्रुतिः । एषा केत्याह । या मदन्यदानं प्रति ममान्यस्मै नलेतराय दानं, तदनुसंधाय किल पिता मामन्यस्मै दास्यतीति भवता परिकल्पितम् । इयं च परिकल्पना भवन्मते वेदः । वेदे हि कस्यापि परिकल्पना न भवत्यपौरुषेयत्वात् । किंचन विद-ष्टयस्तु कस्यापि धूर्तस्य भण्डस्य राक्षसस्य वा परिकल्पनेयमिति मन्यन्ते । स्वकपोलकल्पितार्थां च कुशास्त्रपद्धतौ निजरुच्यैव वेदत्वमारोपयन्ति । तथा भवता कोऽप्ययं वेदः परिकल्पितः । तर्हि वेदस्याद्यावन्ते च वर्तमान ॐकारो वक्ष्य-माणमुक्तं चार्थमनूद्य विधत्ते स्वल्पिदमेवमेवेति । तदस्यापि [११.७] यथो-चितमोङ्कारमग्रेसरमादिभूतं विधेहि । किमित्याह । रात्रेरपि चन्द्रादपरस्य पत्यु-र्भ्रान्तिम् । यथा मम नलेतरप्रतिपादनं तर्कितं, तथा रात्रेरपि चन्द्रापरपतित्वं तर्कयेत्यर्थः । एतस्य वाक्यद्वयस्य परमार्थे विचार्यमाणे स्वल्पत्यन्ताभावः प्रतीयते ॥७५॥

1. B1. ही. 2. B1, B2, D. -रौचकिता. 3. B2, D. om. मनसि.

251

सरोजिनीमानसरागवृत्तेरनर्कसम्पर्कमतर्कयित्वा ।

मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम् ॥७६॥

अन्यदपि निजमतस्थिरीभावप्रतिपादकं वस्त्वन्तरमुपन्यस्यति । स्त्रीजनसमयोचिता च वचनभङ्गिरियं कवेरौचित्यवैदग्धीमुद्बोधयति । अहो भवतोऽधिकतरं साहसिकत्वम् । किमित्याह । इयं मदन्यपाणिग्रहशङ्किता, ममान्येन सह पाणिग्रहो विवाहस्तं शङ्कत इत्येवंशीलस्तस्य भावस्तत्ता । किं कृत्वा ? सरोजिन्या मानसस्य रागेण प्रेम्णा या वृत्तिर्वर्तनं व्यवहरणं तस्या अर्कादन्यस्य छुपनमसम्भाव्य । यद्येतत् सम्भवति, तदा तदपि सम्भवतीत्यर्थः । अतर्कयित्वेत्यस्य शङ्कनक्रियया [1]सहैककर्तृकता । सरोजिन्या नायकत्वमतो मनस्तत्तस्य तस्य रागः । सहसाऽतर्कितमेव वर्तते साहसिकः ॥७६॥

साधु त्वयातर्कि तदेतदेव स्वेनानलं यत्किल संश्रयिष्ये ।

विनामुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ॥७७॥

अथवा त्वया [2]तदेतदेव साध्वतर्कि इदमेव सम्यगभ्युहितम् । एतत्किमित्याह । किलाहं स्वेन निजरुच्यानलं संश्रयिष्ये । किंत्वत्र विशेषोऽस्त्यर्थकृतस्तं दर्शयति । तु पुनरमुना प्रस्तुतेन नायकेन विना स्वात्मनि निजवाड्यात्मनि देहे प्रहर्तुं प्रहारं दाहमरणलक्षणं कर्तुं न पुनर्भवन्तं राजनि प्रकृते मिथ्यावचनं कर्तुम् । अनलो नलादन्यो नायको वह्निश्च । अनलं संश्रयिष्य इति वचनमात्रेण भवतः सम्भावना सत्या खल्वर्थतस्तु दूरमसत्यैव । यस्मिन्नले मयाश्रिते भवान् [3]वैरसेनावसत्य[4]वाकभवेत् तं न संश्रयिष्ये, किन्तु तमप्राप्य यस्मिन् श्रिते मरणं भवेत् तमिति ॥७७॥

1. B1; सहैककर्तृता. B2, D. सहैकर्तृकता. 2. B1. तदेव. 3. D. वीर-. 4. D -वचा-

मद्विप्रलम्भं पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः।
अशक्यशङ्काव्यभिचारहेतुर्वाणी[1] न वेदा यदि सन्तु के तु ॥७८॥

हे सौम्य ! यः पुनस्तर्कस्त्वां मद्विप्रलम्भमाह, मद्वञ्चनीयं कथयति स तर्क-स्तत्फलवाचि, तस्य विप्रलम्भस्य भाषणे किं मूको वचनरहितः। काक्वा तत्र खलु मूको नास्ति, अपि तु तत्रापि पटुजिह्व एवास्ति। किं पुनरशङ्कः कथमिव वक्तु। अयमर्थः। यथा त्वया केना-[७४.a]-पि निजभावसम्भावितेन हेतुना तर्कितं राजपुत्रीयं मां वञ्चयेदपि तथा खल्वेतदर्थं वञ्चयेदित्यपि किं न तर्कितम्[2]। यस्मादेवं ब्रुवत्या मम भवद्वञ्चने फलं नास्ति, तस्मान्मद्वचनं सत्य-मेव, न कथञ्चिदपि वितथं भवतीत्यर्थः। ननु यत्रासत्यत्वे कारणं न भवेत् तत् किं सत्यम्? एवमेवैतत् सत्यमेव। यतः या[3] वाणी वाक् अशक्यशङ्काव्यभिचारहेतुः सा यदि न वेदास्तु पुनस्तर्हि ते वेदा अन्ये के सन्तु। अपि तु यस्या व्यभिचारे-ऽन्यथात्वे शङ्का भ्रान्तिमात्रमपि कर्तुं न शक्यते, सैव वाग् वेदत्वेन व्यपदिश्यते। वेदाः खलु निरूढा न सन्ति, किन्तु यैव सत्या वाक्, त एव वेदाः। वेदवचनानां च[4] व्यभिचारकारणे भ्रान्तिमात्रमपि कर्तुं न शक्यते, पौरुषेयेतरत्वात्। युक्तिगम्यवेदसाम्येनानया निजवाचः सर्वथा व्यभिचाराभावः प्रदर्शितः। व्यभिचारे हेतुर्व्यभिचारहेतुः। अशक्या शङ्का यत्रासावशक्यशङ्कः। अशक्यशङ्को व्यभिचारहेतुर्यत्रे-त्यन्यपदार्थोऽत्र वाणी। अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः वेदा इव वेदाः। यथाग्निर्माणवकः ॥७८॥

अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम्।
ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥७९॥

1. B2 --र्वाणी 2. B2. तर्कियम् 3. B1. om. या 4. B1. om. च.

अथवा केनापि हेतुना दैवयोगाद् वा पिता मामनवध्यायैव नलादितरस्मा एव जुहोति, आहुतिमिव मन्त्रपूर्वं भस्मीभवितुं क्षिपति, इह एवायमस्य चेत् तर्हि शरीरशेषां भावशून्यत्वान्निर्जीवामिव कृशानौ किं न जुहोति। नलादितरो हि ममाशये वरणसंबन्धेन कुण्डाग्निर्भाष्याग्निरेव वा। पिता चेन्मां नलादन्यस्मै ददाति, तर्हि वरं वह्नौ क्षिपतु। नलं विना यदि परं मां देहमात्रावशिष्टां मृतां वह्नौ क्षिपति, न तु श्वसन्तीमन्यस्मै कथमपि ददातीत्यर्थः। ननु त्वद्दत्यप्रतिपादने बलं कुर्वतस्तातस्य नैवैनमहं भजामीति कथं त्वं प्रतिबलं कर्तुं शक्नोषि? अन्यजनकव्यवहारक्रमभङ्गप्रसङ्गाद्धेत्याह। निःसन्देहं स तातस्तनूजन्मनोऽङ्गजायास्तनोमूर्तेरीष्टे प्रभुर्भवति। तताद्धि देहस्य सम्भवस्तं स यथा तथा करोतु। देहो हि तस्य स्वत्वं पात्रे अतिपात्र्यत्वपात्रे वा प्रक्षिपतु। कस्तं तथा विचेष्टमानं वारयितुं शक्तः। एवमपि सति, मम शरीरे वह्नावपि क्षिप्ते मम प्राणानां नाथः प्रभुर्नल एव। शुक्रशोणितसंबन्धाद्धि देहस्य सम्भवस्तत्र च पिता च माता च हेतू। अतोऽत्र तयोः स्वाम्यम्। प्राणास्त्वमूर्ता जीवरूपा भाविसुख-[७४·७]-दुःखमनुसन्धायादृष्टविधिना मूर्तौ सञ्चार्यन्ते। तत्र चादृष्टविधेरेव स्वाम्यम्। तेन च मत्प्राणानां नाथो नलः समादिष्टोऽस्ति। तं चान्यथाकर्तुं कः समर्थः। कन्या पित्रोरधीना ततोपादानान्माताप्राप्त्योभयोः सहचारिभावात्। ईष्ट इत्यस्य कर्मणि षष्ठी ॥७९॥

तदेकदासीत्वपदादुदग्रे मदीप्सिते साधु विधित्सुता ते।
अहेलिना किं नलिनी करोति सुधाकरेणापि सुधाकरेण ॥८०॥

यदुक्तमितः पृथक्प्रार्थयसे तु यद्यदिति तदुत्तरमाह। तस्य नलस्यैकमद्वितीयं सर्वातिशायि यद्दासीत्वपदं किङ्करीत्वमेव सन्नियोगस्थानं यस्मादुदग्रेऽधिके मदीप्सिते मया प्राप्तुमिष्टेऽभिलषिते भवतो विधित्सुता विधातुमिच्छुता साधु युक्तमेतत्।

काक्वा निषेध एवास्यार्थः। त्वयैव तद्भव्यं नाभिहितमित्यर्थः। ननु नलादपरेऽपि विबुधाधिपप्रभृतयो भुवने युवानः सन्ति तत्र कुतस्तवात्यन्तिकमरोचकित्वमित्याह। वस्त्वन्तरं निजमतसाधकम्। नलिनी पद्मिनी सुधायाः पीयूषस्याकरेणोत्पत्तिस्थानेनापि सुधाकरेण चन्द्रमसा किं कुरुते। काक्वा अपि तु न किमपीत्यर्थः। यतस्तेनाऽहेलिना सूर्यादपरेण। पद्मिन्या हि चन्द्रोऽपि मार्तण्ड एव, रुचिप्रदो[1], न तु सुधासान्द्रोऽपि चन्द्रः। तथा ममापि मरणधर्मापि नल एव बलवत् प्रेमरसपात्रं, न त्वमरप्रभुप्रभृतयो हरित्पतयोऽपि। अत्र चाचिन्त्यः सर्गक्रम एव हेतुः। दासीत्वमित्यत्र पुंवद्भावो न भवति।[2] अर्थस्य भाषितपुंस्कत्वाभावात्। दासशब्दो हि कञ्चन पुंस्त्वादिविशिष्टमर्थं पुरस्कृत्य किङ्करे वर्तते। किङ्कर्यां तु स्त्रीत्वादि विशिष्टम्। एवमर्थान्तरः कश्चन तयोर्विशेषोऽस्ति, यथा मदनयोः। अन्यत् तु सहृदयैर्विभाव्यमेतत् ॥८०॥

तदेकलुब्धे हृदि मेऽस्ति लब्धुं चिन्ता न चिन्तामणिमप्यनर्घ्यम्।
ममान्तरेकः सकलत्रिलोकीसारो निधिः पद्ममुखः स एव ॥८१॥

तस्मिन्नले एकस्मिन्नद्वितीये लुब्धे तृष्णजि मम हृदि चित्ते निर्मूल्यं चिन्ता-रत्नमपि प्राप्तुमेकाग्रता ध्यानं नास्ति। कुत इत्याह। यतो मे मनसि समस्त-त्रिजगत्स्थिरांशभूतः स एवैकः कमलाननो नलो निधिर्निधानमस्तीति। यस्य गृहे निधानं भवति, स तेनैव परितृप्तत्वाच्चिन्तारत्नलब्धयेऽपि यत्नं न कुरुते। यस्य हि गृहे निधिर्भवति, तस्य सर्वेऽपि मनोरथाः सिध्यन्ति। मम तु सर्वकाम-परिपूर्तये स एव निधिरिव निधिः, अन्योऽपि निधिः पद्ममुखः पद्मनामा निधि-र्मुखमादिर्यस्येति कृत्वा। अत्र पक्षे तु निधिशब्दो जातिमात्रे पद्मादयो न [११.a] चापि निर्णयः। स एव[3] ममेत्यर्थः। त्रिभुवने हि त एव नव सारभूता अन्यत् सर्वं तदपेक्षया फल्गु। अथ च पद्मवत् कमलतुल्यं मुखं यस्येत्यनेन

1. B1-प्रदाने तु · 2. B1· अर्थभाषितं · 3. B2· मन्येत्यर्थः

भङ्ग्या परम्परया निधानाधिष्ठात्री लक्ष्मीर्नले समाकृष्य[1] निवेश्यते ॥८१॥

श्रुतः स दृष्टः स हरित्सु मोहाद् ध्यातः स नीरन्ध्रितबुद्धिधारम्।
ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेकशेषः ॥८२॥

स श्रुतः श्रवणाभ्याम्, दृष्टश्चक्षुर्भ्याम्, ध्यातो मनसा,। कासु? हरित्सु। कथम्? साक्षात्। कस्मात्? मोहाच्चित्तविभ्रमात्। अत्र भयेऽपि[2] तस्य नलस्य प्रत्यक्षव्यवहारे मोह एव हेतुः। अथवा दिक्षु प्रत्यक्षदर्शनेनैव संबन्धो, मोहस्य तु ध्यानेन मुख्यतया। कथं ध्यातः? नीरन्ध्रिता निश्छिद्रीकृता बुद्धेर्धारा निरन्तरप्रसरो यत्र ध्याने तत् तथा। अत एवाद्य मम द्वयं तव हस्ते तिष्ठति परमेकशेष एकावस्थितिः। किं द्वयमित्याह। तस्य नलस्य लब्धिर्मरणं वा। एकश्चासौ शेषश्चैकशेषः। एक एव शेषो यत्र विधिविशेष इति व्याकरणप्रसिद्धः सङ्केतः ॥८२॥

सञ्चीयतामाश्रितपालनोत्थं मत्प्राणविश्राणनजं च पुण्यम्।
निवार्यतामार्य वृथाऽभिशङ्का भद्रेऽपि मुद्रेयमये भृशं का ॥८३॥

हे आर्य! पितृसमपुण्यं सुकृतं बहूक्रियताम्। कीदृशम्? शरणागतरक्षणजं मज्जीवदानसमुद्भवं[3] च। मां शरणागतां रक्ष, मम जीवं च देहि। पालन एव जीवदानमन्तर्भवेदत्र तु कारणभेदाद् भेदः। निरर्थक एव भ्रमो निवार्यतां किल। इयं पितुर्नियोगेन यदृच्छया वा युवानमन्यं वरिष्यतीत्यादिकुतर्कस्त्य[4]ज्यताम्। अये सौम्य! शोभनेऽपि विषये नितान्तं केयं मुद्रा निषेधोऽप्रवृत्तिस्तवेति शेषः। मुद्रा निषेधः लोकोक्तेरनुकृतिरियम् ॥८३॥

अलं विलङ्घ्य प्रिय! विज्ञ याञ्चां[5] कृत्वाऽपि वाम्यं विविधं विधेये।
यशःपथादाश्रवतापदेत्थात् खलु स्खलित्वास्तखलोक्तिखेलात् ॥८४॥

---

1. B1. -कृष्टा. 2. [illegible] शये. 3. B2 -भेदं. 4. B1. तज्य-. 5. B1. याञ्चाः.

हे प्रिय । विज्ञ [1]हितवेत्तः याच्ञां प्रार्थनां कृत्वापि विलङ्घ्यातिक्रम्यालं पूर्यतां मा प्रार्थनाभङ्गं विधेहि । विधेये कर्तव्ये विविधमनेकरूपं वाम्यं प्रतीपत्वमपि कृत्वा-ऽलम् । तदपि मा कुरु । किञ्च यशःपथात् कीर्तिमार्गात् स्खलित्वा गति-भङ्गं प्राप्य खलु पूर्यतां, ततोऽपि मा स्खल । कीदृशात् ? वचने स्थित आश्रवो वचनकारी, तस्य भाव आश्रवता, तदेव पदं स्थानं तस्मादुत्पन्नात् । अन्योऽपि पन्थाः पदाच्चरणक्रमादुत्पद्यते । यश एव पन्थाः यशःपथः । पुनः कीदृशात् ? [2]अस्ता विनष्टा खलानां दुष्टानामुक्तेर्वचनस्य खेला विलसनं यत्र तस्मात् । अहं हि त्वां शरणमागताऽस्मि, त्वं चेन्मम वचनं करोषि, तदा तव महद् यशो भवति । न चेत् करोषि, तदा तवायशो गायन्तो दुर्जना [3]निंदन्ति । वराकया-ऽयं समाश्रि-[79.b]-तः, परं जलाशयाश्रयोऽयं तिर्यङ् कार्याकार्यं न जानातीति । तत्त्वमविन्दन्तो दुष्टा यतस्ततो यत् तत् प्रलपिष्यन्तीत्यर्थः । तस्मात् प्रसद्य सद्य एव मम वचनमाश्रूयतामिति भावः ॥८४॥

स्वजीव[4]मप्यार्तमुदे दद[5]द्भ्यस्तव त्रपा नेदृशबद्ध[6]मुष्टेः ।
मह्यं मदीयान्यदसूनदित्सोर्धर्मं करात् भ्रंशयति कीर्तिधौतः ॥८५॥

आर्तस्य पीडितस्य मुदे [7]प्रीतये स्वजीवं निजप्राणानपि ददद्भ्यः सम्प्रयच्छद्भ्यो जीमूतवाहन,शिबिप्रभृतिभ्यः सकाशात् तव लज्जा नास्ति । काक्वा अपि तु तव तेभ्यो लज्जा युज्यते । कीदृशस्येत्याह । ईदृशोऽपूर्वो बद्धमुष्टिः कृपणस्तस्य । अथवा ईदृशो दृढो बद्धो रचितो मुष्टिरङ्गुलिसङ्कोचलक्षणो येन तस्य । ननु कथमहं बद्धमुष्टिरित्याह । यस्मात् ते [8]इति कृपणस्य हस्ताद् यशोदुग्धक्षालितं पुण्यमद्यः पतति ।

1. B2. हि तथे कृः. 2. B2. अस्था. 3. B1. विन्दन्ति. 4. B2. -सर्पा- 5. B2. -सूच.
6. B2. तुष्टेः. 7. B1. प्रीतमये. 8. B2, 9. तेति.

किं कर्तुमिच्छोः ? मदीयानसून्जलरूपान् प्राणान् मह्यमेव दातुमनिच्छोः । नलो हि मम प्राणास्ते विधियोगादुपेताः सन्ति, तांश्चेन्मया सङ्गमयसि, ततस्ते दुग्धो-दधिडिण्डीरपिण्डपाण्डुरा कीर्तिर्भवति, कनकाचलतुल्यममूल्यं च सुकृतधनं सञ्चितं भवतीति । जीमूतवाहननाम्ना विद्याधराधिपतिना किल शङ्खचूडनाम्नो भुजङ्ग-श्वरस्य प्राणान् त्रातुं गरुडाय निजदेहो हेलया ढौकितः । शिबिना राज्ञा कपोतरक्षणाय क्षणान्निजमांसान्युत्कृत्य श्येनाय दत्तानीत्यादि ॥८५॥

दत्त्वात्मजीवं त्वयि जीवदेऽपि शुद्ध्यामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणेऽशोद्धुममुद्रदारिद्र्यसमुद्रमग्नाम् ॥८६॥

यः कश्चिज्जीवं ददाति तस्मिन् विषये तावदृणशुद्धिर्न स्यात् । तथापि त्वयि जीवदेऽपि विषयेऽहं शुद्ध्याम्यनृणीभवामि । यदि त्वं कथमपि मम जीवं ददासि, तदहं शुद्ध्याम्यपि । किं कृत्वा ? स्वजीवं दत्त्वा । तु पुनर्जीवाधिकस्य दातरि केन प्रकारेण शुद्ध्यामि । जीवाधिकस्य प्रदातुरृणान्मोक्ष एव न विद्यते । तत् कारणादमुद्रे त्यक्तमर्यादे दारिद्र्यसमुद्रे दौर्गत्यसागरे मग्नां बुडितां विधेहि । किं कर्तुम् । अशोद्धुं शुद्धिमप्राप्तुम् । प्रतीकर्तुमित्यर्थः । केषु ? त्वदृणेषु भवत्-पर्युदंचनेषु[1] । नलो हि मे जीवादप्यधिकतरस्तं चेन्मह्यं ददासि तदहं जन्मसहस्रेऽपि त्वत्तो नानृणी भवामीत्यर्थः ॥८६॥

क्रीणीष्व मत्प्राणमयं च पण्यमन्यन्न चेदस्ति तदस्तु पुण्यम् ।
जीवेशदातर्यदि ते न दातुं यशोऽपि तावत् प्रभवामि गातुम्[2] ॥८७॥

मम जीवितमेव जीवाधिकनललक्षणविक्रेयद्रव्यस्य पण्यं मूल्यं क्रीणीष्व पणायस्व गृहाणेत्यर्थः । नन्वेतावता मू-[४०.ब]-ल्येन नैतद् वस्तु लभ्यत इत्याह ।

1. B1. पर्युचन्दनेषु । B2. पर्युदंचनेषु । 8- पर्यदंचनेषु । 2. 8- गन्तुम्

अन्यत् साम्ययोर्यं परिपूरकं मूल्याङ्कं यन्न विधत्ते, तत् ते पुण्यमस्तु । मूल्यं यावता दीयते तेन ते पुण्यं भवत्विति दुर्गतस्त्रीब्राह्मणाधिक्रयविक्रयवचनानुकृति-मात्रम् । किञ्च । भो श्रीविशदात: साधो ! यदि ते तुच्छमेवमुदाराय[1] बहु मूल्यं वस्तु स्वल्पमूल्येन दत्ते, चेद्दातुं न शक्तास्मि[2] तर्हि ते यशोऽपि गातुं गानपुर:सरं वर्णयितुं तावत् समर्था भवाम्येव । ईदृशोऽयं हंस: स्थूललक्ष इति गायन्ती तव कीर्तिमितस्ततः प्रसृतां करिष्यामीत्यर्थः ॥८७॥

वराटिकोपक्रिययापि लभ्यानिभ्या: कृतज्ञानथवाद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं भणन्तः क्रीणन्ति तानेव तु हन्त सन्तः ॥८८॥

अथवेति पक्षान्तरे इभ्या धनिनः कृतज्ञानुपकारविदः पुरुषानाद्रियन्तेऽपि न । भवतु क्रेष्याम इति स्वीकारायानुमन्यन्ते[3]ऽपि न । कीदृशान् ? लभ्यान् सुप्रापान् । कया ? वराटिकाया: कपर्दिकाया अप्युपक्रियया हिताचरणेन । कपर्दिकया मूल्येना-नायासेन ते प्राप्यन्ते । तथापि तान् क्रेतुं ते क्रेष्याम इति स्वीकारमपि न कुर्वन्ति । तत्त्वतस्तु वराटिकोपकारमात्रेण कृतज्ञत्वादाजन्मनः साधवो वशवर्तिनो भवन्त्युपकर्तृस्तानीदृशान् महाशया धनिन आद्रियन्तेऽपि सत्कुर्वन्त्यपि न । दूरे तिष्ठतु दानं मानमपि तेभ्यो न ददतीत्यर्थः । हन्त खेदे । सन्तो महात्मानस्तानेव कृतज्ञान्[4] प्राणैरेव पणैः काकिणीचतुष्कैः क्रीणन्ति पणायन्ते विसाधयन्तीत्यर्थः । किं कुर्वन्तः ? स्वमात्मानं निपुणमभिज्ञं भणन्तः कथयन्तः । अहो एतावता मूल्येन स्वल्पेतेन लभ्यन्ते । अस्माभिस्तु लब्धा इति स्वं स्तुवन्त इत्यर्थः । अथ च सन्तो धार्मिकास्तानेव कृतज्ञानसुभिरपि मूल्यैर्गृह्णाति[5] (गृह्णन्ति) । परमात्मानं शिक्षितं मन्यमाना: कृतज्ञानां कृते तृणवज्जीवितमपि पुण्यवन्तो वितरन्तीत्यर्थः ।

1. ह. उदाराया. 2. B2. शक्तो. 3. ह. -तेऽपि. 4. ह. -ज्ञान. 5. ह. गृह्णन्ति ।

पणो भवेत् काकिणीचतुष्केण विंशतिभिर्वराटकैरेका काकिणी। वराटकस्तु कपर्दकः पणो द्यूतादिषूत्सृष्टे। इभं गजमर्हतीति इभ्यो धनी ॥८८॥

स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे।
न हीतरस्माद् घटते यदेत्य स्वयं त्वदाप्तिप्रतिभूर्ममाभूः ॥८९॥

स नलो राजाऽष्टावपीन्द्रादयो लोकपालास्तदंशावतारत्वादष्टलोकपालमूर्तिरित्यर्थः। अतस्तैरेवाष्टभिर्मे मम प्रसेदे प्रसन्नीभूतम्। कीदृश्याः? मम तस्मिन् भूभृति एकाग्रा अद्वितीया धीर्बुद्धिर्यस्याः सा तथा तस्याः। हि यस्मादितरस्माद्धेतोरयमर्थो न घटते, न सम्भवति। अर्थः क [४०-७] इत्याह। यत् त्वं स्वयमेत्य मम त्वदाप्तिप्रतिभू-रभूः तल्लब्धिलग्नकः साक्षी सम्पन्नः ॥८९॥

अकाण्डमेवात्मभुवार्जितस्य भूत्वाऽपि मूलं मयि वीरणस्य।
भवान्न मे किं नलदत्वमेत्य कर्ता हृदश्चन्दनलेपकृत्यम् ॥९०॥

भवान् मम चन्दनलेपस्य मलयजोपदेहस्य कृत्यं कार्यं किं न कर्ताऽसि। चन्दनलेपकार्यं विधेहीत्यर्थः। किं कृत्वा? नलं ददातीति नलदस्तस्य भावस्तत्त्वं प्राप्य। नलत्वेन मह्यं भवता [1]दत्तस्तन्निर्वृत्तिकरत्वाच्चन्दनालेप इव कृत इत्यर्थः। किं कृत्वा? भूत्वा सम्पाद्य। किं तत्? मूलं निदानम्। कस्य? रणस्य सङ्ग्रामस्य। कीदृशस्य? अर्जितस्य प्रारब्धस्य। केन? आत्मभुवा कामेन। कदा? अकालमनवसर एव। कीदृशो भवान्। विः पक्षी। [*]रोरेलोपम्। स्वरस्य पूर्वो दीर्घः। अयं कामो अकाण्ड एव यन्मया सह युध्यमानो वर्तते तत्र भवान् हेतुः त्वमेव चेन्मह्यं नलं ददासि तच्चन्दनलेपे च सद्यः सङ्गसुखेन निर्वृणोमि। कामवैरजनिततापेऽपि त्वं मूलं यतः। अथ चार्थान्तरम्। भवान्मम चन्दनलेपं [2]कृत्वा शीतलत्वं किं न करिष्यति।

1. B. दन्त. 2. B. कृत्यं. * रोरेलोपम्?

किं कृत्वा ? जलदत्वं जलतृणविशेषत्वं प्राप्य । किं कृत्वा वीरणस्थानूपजतृण-
-विशेषस्य मूलमुशीरं भूत्वापि । कीदृशस्य ? आत्मभुवा ब्रह्मणा अकालमेव वर्षा-
-समयं विनैवार्जितस्य सृष्टस्य एतानि यानि सुरभिशीतलद्रव्याणि तानि भवानेव
मम सम्पन्नो जलगुणग्रामोपढौकनेन तत्कार्यकरणात् । कर्तेति तृच् श्वस्तनी वा ॥९०॥

अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः ।
गुरूपदेशं प्रतिभेव तीक्ष्णा प्रतीक्षते जातु न कालमर्तिः ॥९१॥

विलम्बं कृत्वा पूर्यताम् । हि यस्मात् क्षिप्रं भवितुं क्षणो वर्तते किलेतीत्याग-
-मोक्तौ विलम्बक्षमे कृत्ये पर्यालोचनं युक्तम् । यतः तीक्ष्णा दुःसहा अर्तिः
पीडा कथञ्चित् समयं न प्रतिपालयति । केव कमित्याह । तीक्ष्णा कुशाग्रीया प्रतिभा
[1]नवनवोन्मेषशालिनी प्रज्ञा यथा गुरोराचार्यस्योपदेशं शिक्षां शास्त्ररहस्यार्थनिरूपणं
न प्रतीक्षते । प्रतिपादयितुमिष्टं हि शास्त्रार्थं प्रतिभा नवानुल्लेखित मात्रमेव सर्वं
[2]यथावत् परिकल्पयितुमुत्सुकी भवति । तथा तीक्ष्णार्तिमानर्तिहेतुं पदार्थं केनापि
प्रापयितुमिष्टं न प्रतीक्षते, किन्तु त्वरिततरं प्रथमत एव प्राप्तुमिच्छति ॥९१॥

अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम् ।
प्रियास्य दाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ॥९२॥

प्रसङ्गान्योपन्यासः । स भूभृदन्तःपुरस्थो भवता इतो [41.a] गतेन मत्कृ-
-तेन याचनीयः यस्मात् तस्मिन्नवसरे श्वत्वपरनारीनिवारणमापतेत् । कीदृशः ?
प्रेयसीमुखानुरोधजः । राजेत्यनेनान्तःपुरसम्पत् तदुपभोगश्च सूचितः ॥९२॥

शुद्धान्तसम्भोगनितान्ततुष्टे न नैषधे कार्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ॥९३॥

1. B1, B2, 8 - नवोल्लेख — 2. B1. तथावत्.

अन्तःपुरपुरन्ध्रिसुरतसुखसंतृप्ते नले इदं मद्दूतत्वलक्षणं प्रयोजनं भवता न वक्तव्यम्। यस्माज्जलस्य तृप्ताय सुहिताय तोयसंस्तुतिर्मृष्टासुरभिः शीतलाऽपि च न रोचते। एतेनाहं सकलविमलगुणगणधरणिरपि तदा वर्ण्यमाना सती तस्मै रुचिप्रदा न भविष्यामीत्यर्थः ॥९३॥

त्वया निधेया न गिरो मदर्था रुषा कदुष्णे हृदि नैषधस्य।
(पित्तेन दूने)
पित्ताभिभूते रसने सितापि तिक्तायते हंसकुलावतंस ॥९४॥

हे मरालकुलालङ्कार! मत्प्रयोजना वाचः कोपकोष्णे नलमनसि भवता न न्यस्याः। कदुष्णे पतितानां तासामपि कदुष्णत्वापत्त्यावुद्वेजकत्वेनारुचिकरत्व-सम्भवात्। रसनेन्द्रिये पित्तेन दोषेणोपतप्ते सति शर्कराऽपि तिक्ता तीक्ष्णा भवति। दृष्टान्तधर्मेण दार्ष्टान्तिकधर्मः साधितः ॥९४॥

धरातुरासाहि मदर्थयाच्ञा कार्या न कार्यान्तरचुम्बिचित्ते।
तदार्थितस्यानवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम् ॥९५॥

कृत्यान्तरव्यासक्तमनसि भूमीन्द्रे मन्निमित्तप्रार्थना न विधेया। तस्मिन्क्षणे याचितस्यानवधारणसुप्तिरनादरसृजनस्य नियोगं धत्ते ॥९५॥

(विज्ञाप्यमिदं) नरेन्द्रे
विज्ञेन विज्ञापयितव्यमेतत् तस्मात् त्वयास्मिन् समयं समीक्ष्य।
आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः कार्यस्य कार्यस्य शुभा विभाति ॥९६॥

यस्मादत्रानवसरे राज्ञि विज्ञप्तौ विधीयमाना यामेतदेतद् दूषणमापतेत्। तस्माद् भवता निपुणेनात्र बहुविधविषयविधेये धराधवेऽवसरं बुध्वा खल्विदं मत्कार्यं विज्ञाप्यं सविनयमावेदनीयम्। ननु क्षणे प्रतीक्ष्यमाणे विलम्बः स्यादित्याह। कार्यस्य करणीयस्यात्यन्तिकासिद्धिविलम्बसिद्ध्योर्मध्ये खल्वार्यस्य मान्यस्य भवतः शुभा श्रेयस्करी का विभाति, कतरा प्रतिभासते। काकुविशेषणद्वयोः पर्यालोचनायां

विलम्बिन्यपि सिद्धिः श्रेयसी न तु तात्कालिकी खल्वसिद्धिः तस्माद् विलम्ब्यापि भवता धीमता तदनुष्ठेयं येन सिद्धिर्मनीषितस्य स्यान्न तु येनासिद्धिरित्यर्थः। आत्यन्तिकी चासावसिद्धिश्च विलम्बिनी चासौ सिद्धिश्चेति पश्चाद् द्वन्द्वः॥९६॥

इत्युक्तवत्या यदलोपि लज्जा सानौचिती चेतसि नश्चकास्तु।

स्मरस्तु साक्षी तददोष-(४१·८)-तायामुन्माद्य यस्तत् तदवीवदत्ताम्॥९७॥

कविराह। एवं भाषितवत्या तया यत् त्रपा लुप्ता साऽस्माकं मनस्यनर्हता प्रतिभासताम्। तया ह्रियं विहाय यद् बहुप्रलपितं तत् कुलबालानां न युक्तमित्यस्माकं मनो मन्यताम्। तु पुनस्तस्या निर्दूषणत्वे काम उपद्रष्टा वर्तते। नास्या दूषणमिति प्रत्यायको मध्यस्थो द्वयोऽस्ति। यस्तामुद्भ्रान्तां कृत्वा तत् तदविहितमपि वादयति स्म। तत्सर्वं पञ्चबाणस्य दूषणमित्यर्थः॥९७॥

उन्मत्तमासाद्य हरः स्मरश्च द्वावप्यसीमां मुदमुद्वहेते।

पूर्वः परस्पर्धितया प्रसूनं नूनं द्वितीयो विरहाधिदूनम्॥९८॥

किमिति पञ्चशरोऽयमेवमाचरतीत्याह। उन्मत्तं प्राप्य रुद्रोऽनङ्गश्चोभावपि निरवधिं प्रीतिं धारयतः। ननून्मत्तशब्देन धत्तूरकुसुममप्यभिधीयते। उद्भ्रान्तश्च ततः कः कं लब्ध्वेत्याह। पूर्वः प्रथमो हरः परस्य द्वितीयस्य स्पर्धितया संहर्तृत्वेन प्रसूनं कुसुममुन्मत्तमासाद्य मोदते, द्वितीयः स्मरो वियोगव्यथो-पतप्तमुन्मत्तमुद्भ्रान्तमासाद्य। हरस्य हि भगवतः परः स्मरः शत्रुः प्रसिद्धः अतो भगवतस्तेन सह स्पर्धिनस्तच्छस्त्र कुसुमप्राप्तौ प्रीतिर्युक्ता। तस्य तु भगवानरिः प्रसिद्धः। विरहिणश्च कामस्य विरोधिनः प्रत्यक्षा एव। तस्मिन् पक्षे चासाद्यापलपितं पलायितमपि लब्ध्वेत्यर्थः। हरो हि वियोगी कामेन विगृहीतस्तदैव च स भगवता नयनार्चिषा प्रज्वाल्य भस्मसात्कृतस्तदादि स

भगवद् विरोधेनान्यानपि वियोगिनः खलु विगृह्णाति । पूर्वःपाठक्रमेण प्रथमः द्वितीयः परः समासच्छन्नमपि परशब्दं द्वितीयशब्दः स्पृशति । सर्वजाम्नानुसन्धि-वृत्तिच्छन्नस्येति व्याघातात् पूर्वःपरस्पर्धितया परःपूर्वस्पर्धितयेति[1] व्याख्येयं पूर्वापरशब्दयोः परस्परं सापेक्षत्वात् ॥९८॥

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम् ।
अमोचि चञ्चूपुटमौनमुद्रा विहायसा तेन विहस्य भूयः ॥९९॥

अथ तेन विहायसा खगेन स्मितं कृत्वा चञ्चूपुटस्य त्रोटिसम्पुटस्य मौन-वशाद्या मुद्रा बन्धः, सा मोक्षिता उक्तमित्यर्थः । पदार्थे वाक्यवचनं कवेः प्रौढिरियम् । किं कृत्वा ? तादृशं वदन्तीमत एव नलासक्तचित्ताम् । भैमीं तर्कयित्वा । मुद्रा राजभूर्यादिगता लाक्षादिमयी सा[2] चिन्हा मुख्याऽन्यत्र त्वौप-चारिकी । विहसन मुद्राः मोचनयोः पूर्वापरकालता यथाकथञ्चिद् घटना-मानेतव्या । मुख्यमुद्रणभेदपुरःसरं हि विहसनं निःसरति । अथवा विहसनस्या-न्तस्तत्त्ववृत्त्या मुख्यान्तर्वर्तिनः पूर्वकालता वर्तत एव रदनच्छ-[५२.a]-द-मुद्रास्फुरणान्तरमाविर्भावमात्रमेव । विहायःशब्दो नभोवचनः सततविहायश्चरत्वादु-पचारेणात्र विहायसि चरे वर्तते । यथाऽभ्रशब्दो मेघे उपचारश्च[3] लोकव्यव-हार एव । न हि यथा विहायःशब्दः पक्षिणि तथा व्योमनभःप्रभृतयोऽपि यथाऽभ्रशब्दो मेघे तथाऽन्येऽप्यभ्रपर्यायः[4] तथा लोकव्यवहाराभावात् । विहायःशब्दश्च पुंनपुंसकयोराम्नातोऽस्तीत्यत्र पुंस्येव ॥९९॥

इदं यदि क्ष्मापतिपुत्रि तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन् ।
त्वामुच्चकैस्तापयता नृपं च पञ्चेषुणैवाजनि योजनेयम् ॥१००॥

1. B1. पूर्वःपर- 2. ? स. 3. B1. उपचारतः. 4. B1. पर्यायाः.

तेन किमुक्तं तदाह। भो भैमि! चेदयं परमार्थस्तर्ह्यत्र विषये निजकृत्यं किमपि न वीक्षे। यतो भवतीं नलं चात्यर्थं तापविषये कुर्वता स्मरेणैवेदं संघटनं कृतम्। लोहकारोऽपि लोहशकले भृशं सन्ताप्य घनेन निहत्य परस्परं साधु संधत्ते यन्मूलमाख्यानकं द्वयोः सन्तप्तयोः सन्धिर्भवतीति साधुर्मिलतीति ॥१००॥

त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः।

त्वामद्य लब्ध्वामृततृप्तिभाजां स्वदेवभूयं चरितार्थमस्तु ॥१०१॥

इदानीं नलस्य यथायुक्ति विरहावस्थां[1] प्रदर्शयति। तस्य नलस्य त्वदेक-ध्यानैकतानस्य बहिरिन्द्रियाणां चक्षुरादीनां स्वस्यात्मनो देवभूयं देवत्वं चरितार्थं सार्थकं भवतु। इन्द्रियाणि हि विषयग्रहणशक्तिसद्भावाद्देवा एव। त एव हि देवा, यत्र काऽप्यचिन्तनीया शक्तिः। कीदृशानाम्? अधुना भवतीं प्राप्य सुधासौहित्यजुषाम्। देवा हि त एव, ये खल्वमृतपानतृप्तिं भजन्ते। भवल्लब्ध्या च तेषां सा सञ्जातैव तत्कार्यकरणात् तस्याः। कैः कृत्वा? त्वां प्राप्येत्याह। तपोभिः सुकृतहेतुभिः कायक्लेशविशेषैः। तेषां च परितापस्य लक्ष्य-माणत्वात् तप आयातम्। इत्यन्तरगर्भं विशेषणमाह। कीदृशानाम्? उपवास-व्रतिनाम्। उपवासो निजविषयोपभोगनिवृत्तिस्तदेव व्रतं[2] विद्यते, येषां तानि, तादृशि तेषां व्रतैस्तपोभिश्च देवत्वे प्राप्ते किलामृतपानम्। नले तु द्वयं विद्यत एव यत् प्रभावात् तल्लब्धिरिति भावः ॥१०१॥

तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं सास्य न ताप्यतेऽपि।

इत्यभ्यसूयन्निव देहतापं तस्यातनुस्त्वद्विरहात् तनोति ॥१०२॥

---

1. B. -स्थां; 2. B. B1. -योग-.

अनङ्गो भवद् वियोगाद्धेतोर्नलस्य देहे तापमूष्माणं करोति । उत्प्रेक्षते ईर्ष्यन्निव इति कथमित्याह । आवयोर्मम नलस्य च मूर्तिस्तनुस्तुल्या समानाभूत्सम्पन्ना । सादृश्यस्य प्रत्यक्षानुभावात्[1] । यथा मे मूर्तिरभूत् तथैवास्यां स विशेषो दृ-[५२. b]-श्यते । तस्मात् तत् सदृशी जातैवेयमिति भूतव्यपदेशः काकुगर्भः । ततश्च किमित्याह । मा मदीया परमधिकतरं यथा स्यादेवं दग्धा ज्वलिता अस्य ताप्यतेऽपि नास्तीति काकुगर्भमिदमपि । तुल्ययोर्हि सम्यक्शापदौ समे युक्ते । तथा न चेदस्यास्तदेतावन्मात्रमपि न भवतु ।[2] तस्य सादृश्यभवनापेक्षया हि तापो न किञ्चिदेव ॥१०२॥.

लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः ।
चक्षुर्भरैरर्पितमात्मचक्षूरागं स धत्ते रचितं त्वया नु[3] ॥१०३॥

स राजा चक्षुर्भरैर्नेत्रवहनैर्दत्तं निजनयनलौहित्यं बिभर्ति । उत्प्रेक्षते त्वयेव रचितं क्लृप्तम् । नयनवाहनादेव तस्य नयनस्थापि रक्तत्वम् । तच्च ज्ञायते भवत्यैव सङ्क्रमितम् । ननु तत्र कुतो मम सद्भाव इत्याह । त्वां यत्नान्निमेषरहितः सन् दृष्ट्या सादरं पश्यन् त्वां किं वस्तु ? लिपिं चित्रमित्यर्थः । ~~(भित्ति हि)~~[4] त्वां लिपिं किमित्याह । भित्तेर्विभूषणं मण्डनम् । बिभर्ति हि त्वत्प्रतिच्छन्देन लिखितेन मण्डिताऽसि तत्र च त्वयि यथास्थानं रागः सिन्दूरादिकोऽसि स एवायं किल सङ्क्रान्त इत्यर्थः । अथ च राग आसक्तिलक्षणः ॥१०३॥

पातुर्दृशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयास्ते ।
ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेष[5]च्छिदया विवादः ॥१०४॥

---

1. ङ. -न् 2. ङ. भस्म. 3. ङ. त्वयैव विभर्ति मूर्तम्॥.
4. B1. बिभर्ति हि. 5. B1 -निमिष-

आस्ते वर्तते । कः? विवादो विप्रतिपत्तिः । कस्याः ? प्रीतिर्मुदः । कीदृश्याः नेत्रवृत्तेः नयनस्थायाः । कथम् ? सह । कया ? निमेषच्छिदया । निमेषोन्मीलनं तस्य छिदा छेदो नाशस्तया । क्व वस्तुनि विवाद इत्याह । अश्रुणि बाष्पे । कथं विवाद आस्त इत्याह । ममेदमिति । यत्राश्रुणि निमेषच्छिदायाः स्वत्वेन संबन्धो वर्तते तत्र नयनप्रीतिः । स्वत्वेन संबन्धमाह । कस्याऽनयोर्द्वयोरित्याह । नृपस्य किं कर्तुः । पातुः पिबनशीलस्य । कां, त्वाम् । कीदृशीम् ? आलेख्यमयीं चित्ररूपाम् । कया कृत्वा पातुरित्याह । दृशा दृष्ट्या । कीदृश्या ? आदराधिक्यादस्तनिमीलया । निमेषा भावाद्-व्यश्रु भवति मुदश्च तदा च नलनयनद्वये तद्[1] द्वयजनितं समतया वर्तते । अतस्तयोर्विप्रतिपत्तिः । निमेषच्छिदायाश्च प्राधान्यमश्रुणि तदनन्तरं प्रीतिः सम्भवात् । निर्निमेषदर्शनादनु हि प्रतीतिः । केचित्तु प्रीत्या कृत्वा निर्निमेषदर्शनमित्याहुः । अपरेऽपि द्वे स्त्रियौ क्वापि समानसंबन्धे वस्तुन्यवश्यं विवदेते । पिबती-त्येवंशीलः पाता तृन् ॥१०४॥

त्वं हृद्गता भैमि बहिर्गताऽपि प्राणायिता नासिकयाऽस्य गत्या ।

न चित्रमाक्रामति तत्र चित्तमेतन्मनो यद् भवदेक-(८३.a)-वृत्ति ॥१०५॥

हे भैमि! त्वं बहिर्गता बाह्ये स्थिताऽपि अस्य नलस्य हृद्गता स्वान्तस्था । किञ्च । कया गत्या कया दशया न प्राणायिताऽसि प्राणवदाचरितासि । कथञ्चन अपि तु सर्वाभिरवस्थाभिस्त्वमेवास्य स्वल्वसव: । अत्र च विरुद्धेऽप्यर्थे न चित्तं कर्तृ चित्रमाक्रामति[2], न भृशमाश्चर्यं प्राप्नोति । कुत इत्याह । यत्कारणादेतस्य मनश्चित्तं भवदेकवृत्ति । भवत्यामेकाऽनन्यसामान्या वृत्तिर्वर्तनं स्थितिर्यस्येति । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः । यश्च यद्गत[3]चित्तः स सर्वं तन्मयं

---

1. B1. तत्तद् , 2. B1. -क्रमभि- 3, B1. -वृत-

पश्यति । अतो मम मनसि नैतदाश्चर्यं स साम्प्रतं यत्र तत्र यत् तद् वस्तु त्वन्मयं पश्यतीत्यर्थः। अथ च प्राणायिता प्राणवायुरिवाचरिता । कया कृत्वा? आस्य गत्या मुखसंचरणेन । कया कृत्वा या श्वसत्यास्यगतिरित्याह। नासिकया कृत्वा । यतः प्राणास्ततो मनो, यतो मनस्तत आत्मा । नलस्य च मनस्त्वमेवासि। अतः परम्परया नासिकया कृत्वा तस्य प्राणाख्यो वायुर्मुखं प्रविशन् त्वमेवासीत्यर्थः ॥१०५॥

अजस्रमारोहसि दूरदीर्घां सङ्कल्पसोपानततिं तदीयाम् ।

श्वासान् स वर्षत्यधिकं पुनर्यद् ध्यानात् तव त्वन्मयतां तदाप्य ॥१०६॥

हे भैमि ! दूरं बहुप्रदेशं यावद् दीर्घा आयामवती तत् संबन्धिनी या सङ्कल्प-सोपानततिर्मानसकर्मारोहणश्रेणी तामजस्रमनवरतं त्वमारोहस्यधितिष्ठसि । श्वासां-श्च मुखपवनलहरी स वर्षति प्रमुञ्चति, तत् तव ध्यानादविच्छिन्नचिन्तना त्वन्मयतां भवत् सारूप्यं प्राप्य । यद्येवं न स्यात्, तदा पूर्वार्थस्यासङ्गतिः स्यात्। कार्यकारणयोरेकत्रासम्भवे ह्यसङ्गतिः। स सन्ततं त्वां ध्यायन् भृशं निःश्वसितीति भावः। यश्च यं देवं ध्यायति, स तद्रूपतां प्राप्नोतीति शास्त्रागमप्रतिपादितोऽर्थः, स क्वापि, केनापि प्रत्यक्षतयाऽपि भ्रमर्याद्युपाख्यानेषु दृष्टोऽस्ति ॥१०६॥

हृत्स्य मां मन्त्रयते रहस्त्वां तद्व्यक्तमामन्त्रयते मुखं यत् ।

तदीयवैरिस्मरमित्रचन्द्रसख्यौचिती सा किमु तन्मुखस्य ॥१०७॥

हे भैमि ! नलवदनस्य सा किम्? तस्य नलस्य वैरी यः पुष्पायुधस्तस्य मित्रं यश्चन्द्रस्तेन सह यत्सख्यं मैत्री, तस्यौचिती योग्यता प्रत्याचरणम् ।

सा केत्याह। तस्य नलस्य दूतकर्तृ रह एकान्ते निभृतां त्वां भवतीं यत् किञ्चिन्मन्त्रयते, गुप्तं वक्ति। तत्सर्वं यन्मुखं कर्तृव्यक्तं प्रकटमामन्त्रयते समाह्वयति। प्रथमार्धावसाने वर्तमानं यदिति पदं सेत्यनेन सह संबध्यते। यदित्यनूद्यं सेति विधेयम्। सर्वनाम्नां विधीयमानानूद्यमा-[४३.७]-न लिङ्ग-ग्रहणे कामचारः। एतेनापस्मारविलसितं चित्तविभ्रमः। नलस्य वैरी स्मरः, स्मरमित्रं चन्द्रश्चन्द्रस्य सखा नलमुखं, तेन मित्रमित्रस्यावश्यमुपकारः कर्तव्यः, तस्य चायमेवोपकारः कामे यन्नलरहस्यप्रकटनम्। तथा हि। स्मरस्य जयो, नलस्य हानिः पर्यवस्यति ॥१०७॥

स्थितस्य रात्रावधिशय्य शय्यां मोहे मनस्तस्य निमज्जयन्ती।
आलिङ्ग्य या चुम्बति लोचने सा निद्राधुना न त्वदृतेऽङ्गना वा ॥१०८॥

इदानीं भवत्या विना तस्य न सा निद्रा, न च नारी। सा केत्याह। या गृहीत्वा नेत्रे स्पृशति। या चोपगुह्य रदनच्छदाभ्यां संयोजयति। किं कार-यन्ती। चित्तं मोहे विचित्तभावे निमज्जयन्ती क्षिपन्ती। द्वाभ्यां द्वयं मनसो भवत्येव तन्द्रासुखवशात्। मोहस्य तु द्वैविध्यमज्ञानपरमानन्दमयत्वात्। कीदृशस्य? निशि पर्यङ्कं तूलिकामधिष्ठाय स्थितस्य। तस्येदृगवस्था वर्तते भवतीं विना यद् वशाद्राभावक्षि न लगति, काचिदङ्गना चाश्लिष्य लोचन-चुम्बनमपि नाचरति कुतस्तयोरधिककार्यावकाश इत्यर्थः ॥१०८॥

स्मरेण सन्तक्ष्य वृथैव बाणैर्लावण्यशेषां कृशतामवापि।
अनङ्गतामप्ययमाप्यमानः स्पर्धां न साधं हि जहाति तेन ॥१०९॥

कामेन भल्लैस्तनू कृत्य निरर्थकमेव रामणीयकमयं दौर्बल्यं प्रापितः। यतोऽयमनङ्गतामशरीरत्वं नीयमानोऽपि स्मरेण सह संघर्षं न त्यजति।

पूर्वं हि कान्तिमत्तया स तेन सार्धं स्पर्धावानभूदधुनाऽनङ्गत्वादपरेणापि विशेषे-णेति रूपातिशयोक्तिः। ईदृशे विरहे हि देहदौर्बल्यमतीव निर्मूल्यमेव। तत्पक्षे न विद्यतेऽङ्गमस्येत्यनङ्गस्तस्य भावोऽनङ्गतेतीषदर्थे नञ् ॥१०९॥

त्वत्प्रापकात् त्रस्यति नैनसोऽपि त्वय्येष दास्येऽपि न लज्जते यत्।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान् किमस्य ॥११०॥

कामेन निशातैः सायकैः सुतरां निशाय कियानपि मनागिवास्य प्राकृतो गुणोऽपि किं कृत्तः। कुत एवं वितर्क इत्याह। यस्माद् भवत्लम्भकात् पापादपि नोद्विजते। भवत्यां किङ्करत्वेऽपि न त्रपते। इतः पूर्वमेतद् द्वयात् तस्य स्वल्प-द्वितीये भीतित्रपे इदानीं तु भवत्प्राप्तिकारकं तदतीव कामयते। अहं तत् पातकमपि करोमि तत् किङ्करत्वमपि समाश्रये येन सा नृपात्मजा प्राप्यत इति। अपिशब्दो डमरुकमणिन्या-[८४.a]-येन काकाक्षिगोलकन्यायेन वो-भयत्र संबध्यते। स्वभावो ह्यमूर्त तस्य लवनं न सम्भवति। तदभावश्च दृश्यते तत एवायमूहः ॥११०॥

स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदङ्कारचये चिकित्सौ।
निदानमौनादविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा ॥१११॥

तस्य मान्मथं सन्तापं दाहं वा घोरं दुःसाध्यं प्रतिचिकीर्षौ सुनि--पुणवैद्यवृन्दे त्रपा प्रविष्टा परं महती। कस्मात्? निदानस्य ज्वरमूल--कारणस्य घर्मसेवनानन्तरजलावगाहादेर्मौनादभाषणात्। अथ च तैः सिद्ध--त्वादेव निदानं विरहलक्षणं ज्ञातमेव परं लज्जया न कथयन्ति। तस्य कीदृशस्य? अपत्रपिष्णोर्लज्जाशीलस्य लज्जाहितेष्वायातेषु सत्सु निज--स्वरूपज्ञानशङ्कया तस्मिन् प्रवर्तते। करनाडीदर्शनादिना वैद्यैर्ज्ञातं ज्वरोऽयं स्मारः।
ज्वं

ततश्च ते निदानं प्रष्टुं प्रवृत्ते स्वामिन् काऽसौ नायिका यन्निमित्तं स्वामी
त्वमीदृगवस्थ इति । अतो ज्ञायते तस्यैव लज्जा तेषु संचारेति । केव रुजेव ।
कीदृशी ? साङ्क्रमिकी । सङ्क्रमणे भवा साङ्क्रमिकी कुष्ठापस्मारादिका सञ्चरण-
-शीला । सा हि किल संसर्गाधिक्यात् पुरुषात् पुरुषान्तरे सञ्चरति ।
अथवा यैर्लिङ्गैः स्मारो[1] ज्वरः परिज्ञायते, तानि लज्जावशात् तेन सर्वाणि
प्रयत्नान्निह्नुतान्यतस्ते कथमपि[2] वितर्कयन्तो[3] स्मारोऽयं ज्वर इति । तदज्ञानात्
कथं निदानज्ञानं भवतु । तदज्ञानं[4] च कथमिव कथ्यताम् । तच्चेन्न
कथितं, तर्हि तेषां सिद्धानां लज्जा युक्तैव । पूर्वं हि ज्ञायते ज्वरोऽयं
वातिकः पैत्तिकः श्लैष्मिको वा तदनु किंमूलोऽयमित्यादिनिदानादिज्ञान-
-मिति । निदानादिस्वरूपं तु चिकित्सागमे ॥१११॥

विभेति रुष्टासि किलेत्यकस्मात् स त्वां किलापैति हसत्यकाण्डे ।
यान्तीमिव त्वामनुयात्यहेतोरुक्तस्त्वयैव प्रतिवक्ति मोघम् ॥११२॥

स नलो कस्माद् भयकारणं विनैव बिभेति । कथं इति । इति कथमित्याह ।
किलेत्यलीके जानाति स त्वं रुष्टासि । तच्च तथा नास्त्येव । तथाऽसौ
प्रस्ताव[5] एव हसति । कुतः इति । इति कुत इत्याह । किल त्वां लेभे ।
तदपि च तथा नास्ति । किञ्च अहेतोः कारणादृते त्वां यान्तीमिवानुयाति ।
तदपि मिथ्यैव । तथा मोघं निरर्थकमेव 'प्रिये ! किं वदसि' इत्यादि प्रत्युत्तरं
ददाति । कीदृगिव भवत्या भाषित इव । तत्त्वतस्तु न तत्र त्वम् । न चैता-
-स्तव चेष्टाः । ईदृशोऽयं कामपिशाचाविष्टजनचेष्टाविशेषः ॥११२॥

---

1. B1. स्मरो. 2. B. कथमिव. 3. B. तर्कन्तो. 4. B. -ज्ञातं.
5. B1. प्रस्ताव.

भवद्वियोगाच्छिदुरार्तिधारायमस्वसुर्मज्जति निःशरण्यः।

मूर्छामयद्वीपमहान्ध्यपङ्के हा हा महीभृद्भटकुञ्जरोऽयम् ॥११३॥

हा हेति खेदातिशये। अयं महीभृद्भटो [94.b] नृपवीर एव कुञ्जरो गजो मज्जति ब्रुडति। क्व मज्जतीत्याह। मूर्छा मोहस्तन्मयं तद्रूपं यद् द्वीपमन्तरीपं तत्र महदान्ध्यमन्धत्वमेव पङ्कः कर्दमस्तत्र। कस्याः भवत्या वियोगस्त्वद्विरहस्तेन तस्माद् वाऽच्छिदुरा निरन्तरा याऽर्तिः पीडाया धारा परम्परा वेणी सैव यमस्वसा यमुना तस्याः कीदृशोऽसौ निःशरण्य उद्धर्तृवर्जितः। अर्तिधारादीनां काष्ण्यात् तत् तद्रूपता तत् तद्धर्म प्रतीतिः। अन्योऽपि शूरः कुञ्जरो यदा कर्दमवति यमुनाद्वीपे मज्जति तस्योद्धर्ता च कश्चित् सन्निहितो न भवति, तदा तद्दर्शिभिर्हा यथा हा हा विरुद्धं जातमिति प्रलप्यते शोच्यते च ॥११३॥

सव्यापसव्यत्यजनाद्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु।

दशासु शेषः खलु तद्दशा या तया नभः पुष्यतु कोरकेण ॥११४॥

सव्यं चापसव्यं च सव्यापसव्ये वामदक्षिणक्रमस्तेन यत् त्यजनं मोक्षणं तस्माद्विरुक्तैर्द्विगुणितैरित्यर्थः। पञ्चशरस्य शरैः पृथक् प्रत्येकमर्जितासु प्रारब्धासु, अर्थाद् दशासु दशासु मध्ये शेषोऽवशिष्टांशः सीमस्थानं या दशाऽवस्थाऽर्थाद् दशमी मरणलक्षणा तयैव दशया कोरकेण कलिकया नभः पुष्यतु कुसुमितं भवतु। सा सर्वथैव माऽभूदित्यर्थः। एताः पूर्वप्रतिपादिता व्यस्ताः समस्ताश्च कामजनिता विरहाऽवस्था नव। केवलं दशमी मरणलक्षणा न विद्यते सा च त्वत् प्रसादात् तस्य निवर्तत इति भावः। तादृशावस्था यथा -"अभिलाषश्चिन्ता च स्मरणं गुणकीर्तनं तथोद्वेगः। प्रलपनमुन्मादो व्याधिरथ च जडता च मरणं च" इति एताः क्रमेण ज्ञेयाः ॥११४॥

त्वयि स्मराधैः सततास्मितेन प्रस्थापितो भूमिभृतास्मि तेन।

आगत्य भूतः सफलो भवत्या भावप्रतीत्या गुणलोभवत्याः ॥११५॥

तेन भूमिभृता स्मराधैर्मन्मथव्यथावशात् सततास्मितेन निरन्तरविहसितरहितेन त्वयि विषयेऽहं प्रेषितोऽस्मि। तदादेशाद् भवतीमिवोद्दिश्य ममेहागमनमित्यर्थः। इदानीं चाहं गुणानुरक्तायास्तव भावप्रतीत्याऽभिप्रायस्य सम्यगवबोधेन कृत्वा सफलः कृतकृत्यः सम्पन्नोऽस्मि ॥११५॥

धन्याऽसि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।

इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥११६॥

भैमि! त्वं पुण्यवती वर्तसे। कुत इत्याह - यया त्वयोदारैः प्रगल्भैः गुणैः सौन्दर्यादिभिर्गुणैः कृत्वा नलस्तथा स्थिरचित्तोऽपि समाकृष्यताभिमुखमाहूतः। ननु कियन्मात्रमेतदित्याशङ्क्य प्रस्तुतवस्तुसाधनाय वस्त्वन्तरमुपन्यस्यति। एतस्माद्-
-[४५.a]-र्थान्निश्चितं ज्योत्स्नायाः परा प्रशंसा काऽस्तु। इतः कुत इत्याह। यदब्धिं समुद्रमपि तथा गम्भीरमसीममुत्तरलयति। कौमुद्याः स्वत्वियमेव महती श्लाघा यन्निजसम्पर्कमात्रेण जलनिधिमुत्कल्लोलयति। अन्योऽपि गुणैर्बद्ध्वा समाकृष्यते ॥११६॥

नलेन भायाः शशिना निशेव त्वया सभायान्निशया शशीव।

पुनः पुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः ॥११७॥

आशंसते त्वं नलेन कृत्वा सह वा भायाः शोभेथाः। केनेव केत्याह। शशिना निशा यथा। त्वया कृत्वा स भायात्। कया क इवेत्याह। निशया कृत्वा शशी यथाऽनुसम्भाय-
-यामि। विधाता सृष्टा योग्यामुपास्ते खुरलीं परिशीलयति। अभ्यासं करोतीत्यर्थः। कीदृशः? पुनः पुनर्भूयो भूयस्तयोः शशिनिशयोर्युगं युनक्तीति तद्युगयुक्, यथैतद्द्वयं

युञ्जन्नस्ति एवं युवां यथावद्वोक्तुमिच्छतीत्यर्थः ॥११७॥

स्तनद्वये तन्वि परं तवैव पृथौ यदि प्राप्स्यति नैषधस्य ।

अनल्पवैदग्ध्यविवर्धनीनां पत्रावलीनां वलना समाप्तिम् ॥११८॥

हे भैमि! नलस्य मकरिकादितिलकविशेषरचनानां वलना भ्रान्तिर्यदि परं तवैव कुचयुगले सम्पूर्णतां लप्स्यते। यतः कीदृशे विपुले। तासां चान्येन सर्वोत्कृष्टेन वैदग्ध्येन चातुर्येण विवर्धनीनां वर्धिष्णूनामिति। अन्या खलु काचन तादृग् विपुलकुचा नास्ति यस्या वक्षोजयुगले नलस्य कलावतस्तिलकविच्छित्तिविशेषा। निःशेषा भवन्तीति भाविसुरताईरहस्यसूचनेन पुनराशास्ते ॥११८॥

एकः सुधांशुर्न कथञ्चन स्यात् तृप्तिक्षमस्त्वन्नयनद्वयस्य ।

त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः ॥११९॥

एकश्चन्द्रस्त्वन्नेत्रयुग्मस्य केनापि प्रकारेण तृप्तये सन्तोषाय शक्तो न स्यात्। नेत्रे द्वे, चंद्र एक इति पूर्णप्रीतये वैषम्यम्। तस्मान्नलमुखचन्द्रेण कृत्वा सद्वितीयः ससहायः सन् भवन्नेत्रयोरतितरां तृप्तये भवतु। सह द्वितीयेन वर्तते सद्वितीयः। नलास्येन शीतद्युतिना कृत्वा सद्वितीयो नलास्यशीतद्युतिसद्वितीयः। तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ॥११९॥

अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः ।

त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः ॥१२०॥

यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्ते ।

अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव ॥१२१॥

अहो चित्रे। नलसंबन्धी तपोरूपः कल्पपादपः कोऽप्यपूर्वः। काकुप्रयोगोऽत्र कीदृशः? भवन्नखकोटय एव स्फुरन्ती द्योतमानाऽङ्कुरश्रीरभिनवोद्भेदसम्पद्यस्य

स तथा । [४५ ए] खलु नूनं यस्य द्विपत्री द्विपर्णी भवद्भ्रूद्वयम् । तथाधरोष्ठो यस्य कलम्बः कन्दलं रज्यति लोहितायते । यो भवत्याः पाणिद्वयेन कृत्वा सञ्जातनवकिसलयः । यो भवद्विहसितेन कृत्वा सञ्जातजालकः । नव ननु सौकुमार्येण यः कुसुमितोऽस्ति । तवैव कुचरचनया यः सञ्जातफलकः । अङ्कुरादिक्रमनिर्देशात् क्रमपरिकरः । द्वयोः पत्रयोः समाहारो द्विपत्री । रूपकमलङ्कारः ॥१२०॥१२१॥

कांसीकृतासीत्खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण ।

तुला च नाराचलता निजैव मिथोऽनुरागस्य समीकृतौ वाम् ॥१२२॥

स्फुटं कामेनेन्दुमण्डली कांसीकृतासीत् । कांसी वणिजां गुडलवणादितोलनभाण्डम् । यतः कीदृशी? संसक्तः संलग्नो रश्मीनां प्रकरः समुदायो यत्र । रश्मयो गुणविशेषाः । तत्त्वतस्तु किरणाः सन्त्येव । आत्मीयैव नाराचलता कृता नाराचलतार्थं प्रयत्नान्तरं न कृतम् । सा हि सिद्धा प्रथमत एव स्वकीयैवास्ति । नाराचो लोहमयः काण्डः । वणिजां चाक्षराङ्कितं तोलनभाण्डम् । किमर्थमेवं कृतवानित्याह । वां युवयोर्मिथः परस्परमनुरागस्य प्रेमरसस्य समीकृतौ साम्यकारणनिमित्तम् । असमयोः समयोः कृतिः समीकृतिः । अथवा असमस्य समस्य कृतिः । अनुराग एक एव जातिः, व्यक्ती तु द्वे ॥ १२२॥

सत्त्वस्रुतस्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु ।

लग्नोत्थितास्त्वत्कुचपत्रलेखा यन्निर्गतास्तं प्रविशन्तु भूयः ॥१२३॥

हे भैमि! तव कुचयोः पत्रलेखास्तिलकीभूताः कस्तूरिकादिरचिता मकरिका-
-स्त (रु)यात् तव पाणिपद्मान्निर्गता जाता भूयस्तदेव पाणिपद्मं प्रविशन्तु । तेन हि पूर्वं ताः प्रकल्पिताः । कीदृश्यः? लग्नोत्थिताः । पूर्वं लग्ना, पश्चादुत्थिताः, लग्नोत्थिताः । केषु? मदनोत्सवेषु सुरतेषु । यतः कीदृशे तस्मिन्? सत्त्वेन गुणविशेषेण स्रुतः क्षरितो यः स्वेदो घर्मजलं, तदेव मधूत्थं सिक्थकं, तेन सान्द्रे घने ।

अन्यदपि मूर्धादिसंसक्तं सिन्दूरादिकोमलमधूलीस्थलिप्रदेन पाणिना पाणौ धा गृह्णमुत्तिष्ठते ॥१२३॥

बन्धाढ्यनानारतमल्लयुद्धप्रमोदितैः केलिवने मरुद्भिः।

प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि युवां युवानौ ॥१२४॥

हे भैमि! त्वं च नलश्च युवां द्वौ युवती च युवा च युवानौ प्रसूनवृष्टिं पुष्पवर्षं प्रतीच्छतं प्रतिगृह्णीतम्। कीदृशीम्? पुनरुक्तमुक्तां पुनः पुनः क्षिप्ताम्। कैः? मरुद्भिर्वातैः। कीदृशैः? बन्धाः करणविशेषास्तैराढ्यं पूर्णं नानाविधं यद्रतं निधुवनं तदेव मल्लयुद्धं मुष्टिलत्तादिप्रहाराधिकं नियुद्धं तस्य प्रमा प्रकृष्टं मान-[98.a]-माधिक्यं तस्मादुत्थितैः। क्व? केलिवने क्रीडाकानने। बहुविध-बन्धाधिकसुरतरभसवशेन हि यूनोः क्रीडावने निरर्गलं क्रीडतोस्तरुगुल्मलतादि-संघट्टसमुत्थितो वायुस्तदुपरि कुसुमानि वर्षति। अन्यत्रापि बन्धाधिकमल्लयुद्धेन प्रमोदितैस्तोषितैर्निजकेलिवनेऽर्थान्नन्दने वर्तमानैर्मरुद्भिर्देवैः पुनः पुनः क्षिप्तां पुष्पवृष्टिं कावपि युवानौ प्रतीच्छतः ॥१२४॥

अन्योऽन्यसङ्गमवशादधुना विभातां तस्यापि तेऽपि मनसी विकसद्विलासे।

स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥१२५॥

विभातां शोभताम्। के? मनसी द्वे चित्ते। कयोरित्याह। तस्याऽपि तेऽपि नलस्य च भवत्याश्च। कीदृशी? विकसन् प्रसरन् विलासो विभ्रमो ययोस्ते तथा। कुतः? अन्योन्यसङ्गमवशात् परस्परसंयोगपारतन्त्र्यात् वशः कान्तिर्वा उत्प्रेक्ष्यते। परमाणु-युग्ममिव। कीदृशम्? द्व्यणुककृत्। द्वावणुपरिमाणमस्येति द्व्यणुकम्। अथवा द्वयोरण्वोः समाहारो द्व्यणुकं, तनुतरवस्तु विशेषो यतो द्विगुणत्रिगुणादिकृतान्मेरु-मन्दरादिमूर्तसृष्टिः। द्व्यणुकं करोतीति द्व्यणुककृत् द्व्यणुकस्यारम्भकम्। कीदृशम्? प्रवृत्तं कृतारम्भं किं कर्तुं स्रष्टुं निर्मातुम्। काम्? तनुं मूर्तिम्।

कस्य ? मनसिजस्य कामस्य । कदा ? आदौ प्रथमतः स्मरश्च मनसो जातः कथ्यते ॥१२५॥

काम: कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु-
-र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ ।
ग्रीवालङ्कृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कषरेखयेव निवसत्सिन्दूरसौन्दर्यया ॥१२६॥

हे भैमि ! असौ कामो माद्यति हृष्यति । किं कृत्वा ? त्वां भवतीं धनुर्वल्लीं चापलतामासाद्य प्राप्य । किं कर्तुम् ? जेतुं वशीकर्तुम् । कम् ? अमुं नृपं नलम् । यतः कीदृशम् ? कुसुमस्येदं कौसुमं तच्च तच्चापं च तेन दुर्जयं जेतुमशक्यम् । त्वां कीदृशीम् ? अव्रणवंशजाम् । अव्रणात् घुणाद्यभक्षिताद्[1] वंशाद्वेणोर्जाता निष्पन्ना ताम् । पुनः कीदृशीम् ? अधिगुणामधिष्ठितमौर्वीकाम् । तत्त्वतस्तु निर्दोषान्वयभूतां प्रभूतलावण्यादिविशेषां च । पुनः कीदृशीम् ? भ्राजिष्णुमतिशोभमानाम्[2] । कयेव कष-रेखयेव परीक्षणराज्येव । कीदृश्या ? निवसद् वर्तमानं सिन्दूरस्य सौन्दर्यं चारुता यत्र तथा । तिष्ठत्सिन्दूररुच्येत्यर्थः । कया कषरेखासमयेत्याह । ग्रीवाया अलङ्कृति-मण्डनं या पट्टसूत्रस्य कौशेयस्य लतावल्ली छराल्लकसंज्ञामध्यदेशप्रसिद्धा तथा । कीदृश्या ? कियन्मनाक् पृष्ठे तनोरपरप्रदेशे लम्बया विस्रंसिन्या । हिमाचलजवंश-धनुर्यष्टिपरीक्षार्थं [४८.७] पृष्ठदेशस्य राजिर्नितक्ष्य[3] क्रियते, सा च संमृष्ट-(मृ)-सिन्दूररजोभिर्भ्रियते । यदि सिन्दूरं राजीं भित्त्वाऽवतिष्ठते, संघृष्टमपि न विनश्यति, तदा सा जात्याकरोद्भवा परिपक्वा च न चेद् विपरीता । कौशेयतन्तुनिर्मित-मीदृशं ग्रीवाभरणं यद्यपि विदर्भदेशे न व्यवहरति, तथापि निजदेशानुभवा-ल्लाटदेशीयेन श्रीमता कविराजेन वर्णितम् ॥१२६॥

---

1. B1. – भक्षितात् . 2. B1.–शोभनाम् . 3. E. नितक्ष्य.

त्वद्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो-
-र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्वल्लरीम्।
यन्नित्याङ्कनिवासलालिततमज्याभुज्यमानं लस-
-न्नाभीमध्यबिला विलासमखिलं रोमालिरालम्बते ॥१२७॥

हे भैमि! तव गुच्छानां हारभेदानामावलिः स्रक्, तस्या मौक्तिकानि मुक्ता-
-फलान्येव गुलिका वर्तुलवटिका विद्धि। तं राजहंसं रक्तैश्चञ्चुचरणैरुपलक्षितं
मरालं वेध्यं, वेधनीयं लक्ष्यं (ध्येयं) विद्धि। स्वमप्यात्मानमपि मञ्जुं मनोज्ञां
धनुर्मञ्जरीं चापमुकुलवल्लरीं विद्धि। कस्य? मनोभुवो विभोः कन्दर्पस्याधिपतेः।
कां धनुर्मञ्जरीमित्याह। तां तां कामित्याह। यस्या अङ्के क्रोडे योऽसौ निवासः
सर्वकालस्थितिस्तथा लालिततमा नितान्तं नर्तिता या ज्या मौर्वी तया भुज्य-
-मानमनुभूयमानमखिलं, अखण्डं विलासं विभ्रमं रोमाली रोमराजिरालम्बते,
संश्रयति। तस्याः कार्यं सैव करोतीत्यर्थः। कीदृशी? लसद् विद्योतमानमतिप्रकटं
नाभ्येव मध्यं बिलं यस्यां सा तथा। गोलकधनुष्किका खल्वीदृग्विधैव
भवति। प्रभुश्च प्रायः पक्षिमृगयां तयैव करोति। तस्य च राजहंसा अपि
स्वाधीनाः। तत्त्वतस्तु राजहंस इव राजहंस इति प्रशंसावचनैश्च रूढैरिति समासः॥१२७॥

पुष्पेषुश्चिकुरेषु ते शरचयं स्वं भालमूले धनु-
रौद्रे चक्षुषि लज्जितस्तनुमनुभ्राष्ट्रे च यन्निक्षिपे।
निर्विद्याश्रयराश्रमं स वितनुस्त्वां लज्जयाद्याधुना
पत्रालिस्त्वदुरोजशैलनिलया तत्पर्णशालायते ॥१२८॥

हे भैमि! पुष्पेषुः कामोऽर्थान्नलेन तर्जितो भर्त्सितः सन्, स्वमात्मीयं शरचयं
बाणपूगं ते तव चिकुरेषु कचकलापे निचिक्षिपे निक्षिप्तवान्। स पुष्पेषुस्तत्र

च पुष्पाणि साक्षाद् विद्धौ न एवेति निश्चयः। यः स्वं धनुस्तव भालमूले निचिक्षिपे। अत्र च सादृश्यसामर्थ्याद् भ्रुवोर्लब्धिः। अन्यच्च। यः स्वां तनुं चिक्षिपे। क्व? भ्राष्ट्रमनु अनुभ्राष्ट्रं भ्राष्ट्रे इत्यर्थः। कस्मिन् भ्राष्ट्रे इत्याह। रौद्रे चक्षुषि शाम्भवे नेत्रे एतदप्युप-[९७.ब]-पपन्नमेव प्रतिपादितसंविधान सम्भवात्। स पुष्पेषुरधुना वितनुर्विदेहः सन्, निर्विद्य विरज्य निर्विण्णो भूत्वा तां भवतीमाश्रमं तपःसाधनोचितं स्थानमाश्रयद् भेजे। किमर्थम्? तस्य नलस्य जयाय वशीकरणार्थम्। कथं ~~आश्रयत~~ आश्रयत इति तत्र हेतुमाह। तव उरोजौ कुचौ तावेव शैलौ गिरी स एव निलयः स्थानं यस्याः सा पत्राणामावलिः श्रेणी, तस्य या पर्णानां शाला विपुलमुरजं तद्वदाचरति। पत्राणि पलाशादिदलानि। अन्यत्तस्तु पत्राणि पत्राकृतयस्तिलकविच्छित्तयः। अन्योऽपि भटः केनापि प्रतिभटेन यदि तर्जितो भवति, स निजं धनुः शरांश्च क्वचित् प्रतीतिस्थाने निक्षिप्य स्वां च रौद्रभ्राष्ट्रसदृशे क्लेशे सन्तापे वा तनुं निक्षिप्य वितनुर्विदेहः सन् वैराग्यं प्राप्य क्वापि हिमाचलाद्यद्रौ तस्य जयाय पर्णशालायतन् तमाश्रममाश्रयति ॥१२८॥

इत्यालपत्यथ पतत्रिणि तत्र भैमीं सख्यश्चिरात्तदनुसंधिपराः परीयुः।
शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य वेगाज्जगाम निषधाधिपराजधानीम् ॥१२९॥

अथ वयस्या अनुसन्धौ पद्मान्वेषणपरास्तन्निष्ठाः सख्यः परीयुः परागताः। इतस्ततः आगत्य तां परिवार्य तस्थुरित्यर्थः। क्व सति? तस्मिन् स्थाने हंसे भैमीमेवमाभाषमाणे सति। सोऽपि हंसो स्थाननलनिवासपुरीं गतः। किं कृत्वा? इत्युच्चार्य इति कथमित्याह। हे भैमि! तव परमभिलषितं सुखं भवतु मां विसृज प्रेषयेति सन् कथार्थां प्रसरसंक्षेपवैदग्ध्यात् कवेः प्रौढिः ॥१२९॥

चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रय-
-त्प्रेयोदूतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात् ।
स्वादं स्वादमसीममृष्टसुरभि प्राप्ताऽपि तृप्तिं न सा
तापं प्राप नितान्तमन्तरतुलामानर्च्छ मूर्च्छामपि ॥१३०॥

सा भैमी तृप्तिं सौहित्यं प्राप्ता गताऽपि सती तापं न प्राप। काक्वा विधिः। अपि तु तापं प्रापैव। कथम्? नितान्तमतिशयेन। क्व? अन्तर्मध्ये। किञ्च मूर्च्छामप्यानर्च्छ प्राप। द्वयं प्राप्तेत्यर्थः। किं कृत्वा तृप्तिं प्राप्तेत्याह। रसात् रागात्। स्वादं स्वादमास्वाद्यास्वाद्य। किं तत्प्रेयान्नलस्तस्य दूतः सन्देशहरो यः पतङ्गपुङ्गवो हंसराट् तस्य गौर्वाक्। अथ च शृङ्गिणी। प्रेयोदूतपतङ्गपुङ्गवगवी तस्या हैयङ्गवीनं ह्योगोदोहोद्भवं घृतम्। कीदृशम्? मृष्टं स्वादु सुरभि सामोदम्। कथं यथा स्यात्। असीम अतितरां सुस्वादु सुगन्धमित्यर्थः। किं कुर्वत्? आश्रयद् भजत्। काम्? व्यामिश्रतां सांकर्यम्। कैः? चेतोजन्मा कामस्तस्य शराः कुसुमानि तेषां मधूनि क्षौद्राणि। तत्त्वतस्तु मकरन्दाः। गोश्चेत् तद्वत् तस्याः सर्वे धर्मा आयान्त्येव। मधुश-[४७.८]-ब्दोऽत्र मकरन्दे क्षौद्रे च गव्यं घृतं च मधु च समतायां विमिश्रित-मुपविषं भवति। तस्य च तापोऽन्त मूर्च्छा च प्रथमं कार्यम्। तस्या-स्तदवस्थादर्शनादित्यमूहः ॥१३०॥

तस्या दशाधिपतिबन्धुमनुव्रजन्त्या-
-स्तं बाष्पवारि न चिराद्वधीवभूव ।
पार्श्वेऽपि विप्रचकृषे यदनेन दृष्टे-
-राराद्पि व्यवदधे न तु चित्तवृत्तेः ॥१३१॥

तस्या भैम्या बाष्पवारि अश्रुजलं चिराद् विलम्ब्य नावधीबभूव, न सीमा-
-ऽऽसीत्। अपि तु, व्यस्तिमेवाशु शोधकमभूत्। किं कुर्वन्त्याः? तं हंसमधिपति-
-बन्धुं प्राणेशस्वजनं दृशा दृष्ट्या कृत्वाऽनुव्रजन्त्या अनुयान्त्याः। कथमेवं
ज्ञायत इत्याह। यत् कारणावनेन हंसेन पार्श्वेऽपि वर्तमानेन विप्रकृष्टे।
विप्रकृष्टेन आतम्। चित्तवृत्तेर्मनोव्यापारात् सकाशात् पुनर्दूरेऽपि वर्तमानेन
सता न व्यवदधे, न व्यवहितं न भूतमिति[1] भावो, बन्धुमनुव्रजद्भिर्नदी-
-जलाशयो वाऽन्यः शोभनस्येन्निकटेऽपि धत्ते। तथा तत्रैव स्थैर्यं न
पुरतोऽन्यन्नदयादि गवेषयेरित्यर्थः। अथवाऽन्येषामपि बन्धुमनुव्रजतां
सुहृदां स्वभावोऽयं यत् तस्मिन् क्रमद्वयमात्रं चलित एव तेषामश्रुजलै-
-र्नयने पूर्येते। अतोऽसौ निकटस्थोऽप्यदृश्यमानत्वात् तेषां विप्रकृष्टो
भवति। चित्तवृत्तेस्तु नोत्तरति ॥१३१॥

अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन् पक्षयोः कम्पभेदै-
-राख्याता[2] वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे।
कान्तारे निर्गतासि प्रियसखि! पदवीं विस्मृता किन्नु मुग्धे!
मा शोचीरेहि यामेत्युपहृतवचसो निन्युरेनां वयस्याः ॥१३२॥

एको हंसः प्रस्थितः। कीदृशः? इमं वृत्तान्तमशेषं नले कथयितुकामः। किं
कुर्वन्? कर्तव्यनिष्पत्तेः सद्भावं प्रकटं निवेदयन्निव। कैः पक्षपुटयोरन्यान्न-
-विशेषैरित्यनेन संज्ञाऽभिनयः स्वयं ज्ञेयः। कार्यं ज्ञातं जातं जातमिति। यथा
कोऽपि करकम्पभेदसंज्ञया स्वामिने निवेदयति। एनां भैमीं च सख्यः प्रति-
-गमयन्ति स्म। कीदृश्यः? इत्युपनीतवाचः[3]। इति कथमित्याह। हे प्रिय वयस्ये!

1. 8. भावे. 2. B1. marginalia. आख्यातुं. 3. B1. -मीत-

त्वं किं कान्तारे दुर्गमे पथि निर्याता निर्गत्य लग्नाऽसि सरणिं किं न जानासि।
हे मुग्धे! अकुशले! मा रुदिहि, आगच्छ गच्छामेति जातिः। पक्षयोरिति भीम-
-भीमसेनवत्। अथवा पक्षद्वयस्थितपक्षराशिद्वयं पक्षौ। आख्यातेति तृन्॥१३२॥

सरसि नृपमपश्यद्यत्र तत्तीरभाजः स्मरतरलमशोकानोकहस्योपमूलम्।
किसलयदलतल्पम्लायिनं प्राप तं स ज्वलदसमशरेषुस्पर्धिपुष्पर्धिमौलेः॥१३३॥

स हंसो यत्र कासारे नलमैक्षिष्ट प्रथमं तस्य [६४-a] तीरं श्रितवतः।
किं केलिद्रुमस्य मूले कामलोलं लेभे। कीदृशम्? पल्लवशयनम्लानिजनकम्।
कीदृशस्याशोकतरोरित्याह। ज्वलन्त्यो दीप्यमाना, असमशरस्य विषमविशिखस्य
ये इषवो बाणास्ताभिः सह लौहित्यात् स्पर्धते संहृष्यतीत्येवंशीला पुष्पाणामृद्धिः
सम्पन्मौलौ शिखरे यस्य स तथा तस्य। अशोककुसुमानां लौहित्यं च प्रसिद्धम्।
म्लायिरिनन्तः। केचित् तु किसलयतल्पे म्लायतीत्येवंशीलमित्याहुः॥१३३॥

परवति दमयन्ति! त्वां न किञ्चिद् वदामि
द्रुतमुपनम किं मामाह सा शंस हंस!।
इति वदति नलेऽसौ तच्छशंसोपनम्रः
प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः॥१३४॥

नल इति ब्रुवाणे सत्येव हंस उपस्थितः। सु(शं?)सस्तदेव तदग्रेषं विस्पष्टमाचष्ट
इति। कथमित्याह। हे भैमि परायत्ते! भवतीं किमपि विधादनुगतं न वच्मि।
हे मराल! शीघ्रमुपागच्छ, सा नृपपुत्री मां किमब्रवीत्। ननु तेन भ्रान्त्या यदुक्तं
तत् कथं सत्यमभूदित्याह। युक्तमेतत् हि यस्मात् सुकृतां पुण्यकारिणां प्रिय-
-मनु रुचितमर्थं प्रति स्वस्पृहाया निजेच्छाया एव विलम्बः कालक्षेपो भवति।
कावचा, अपि तु प्राप्तेरित्यर्थः। इच्छामात्रेण पुण्यवतामिष्टं घटत इति यावत्।

सुष्ठु कृतवान् सुकृत्। कृञः सु पुण्यपापमन्त्रपदेष्वित्यतीति क्विप् ॥१३४॥

कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन् भाषितं स्वप्रियायाः।
अधिगतमथ सान्द्रानन्दमाध्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ॥१३५॥

नृपः उक्तं मरालं वाचयामास। किं तत् दमयन्त्या उदितं वचनमित्यर्थः। किं कुर्वन्? इति भूयो भूयः पृच्छन् जिज्ञासन्[1] इति कथमित्याह। किमिति किमिति किं किं सन्दिष्टं किमवादीत्सा मह्यमित्यादि। अथ पश्चात् तत्सर्वं तथा तेनैव प्रकारेणान्वाचचक्षेऽनुवदति स्म। कथम्? शतवारान्। कीदृशं सत्? अधिगतं ज्ञातं सत्। ननु किमित्येवं स व्यचेष्टतेत्याह। कीदृशः सः? सान्द्रो घनो य आनन्दो हर्षस्तदेव माध्वीकं द्राक्षासवस्तेन मत्तः क्षीबः। अन्योऽपि हारहूरा[2]-मदमत्तः पुमानेवंप्रकृतिरेव भवति ॥१३५॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
-काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१३६॥

यथा द्वैतीयीकतया, तथैव तार्तीयीकतयेति शुभम् ॥१३६॥

शाण्डिल्यनाममुनिवंशकरीरकस्य, श्रीधीरधीरतनयस्य गदाधरस्य।
क्लृप्तौ सुधामधुनि नैषधटीकिकायां, सर्गस्तृतीय इति सम्प्रति पूर्यते स्म ॥

पुनर्नलहंससमागमः। शुभं भवतु लेखकपाठकयोः ॥श्री॥ [४४. ८].

---

1. B1. जिज्ञासमास गं. 2. हारहूरा- ?